" ॐ तत्सत् "

ज्योतिर्भूषण.

संपादकः—ज्योतिषरत्न पंडित रघुनाथशास्त्री पटवर्धन, पुणें.

वर्ष १२) शके १८५१ सन १९२९ (पुस्तक १ लें.

धनयोग दारिद्र्ययोग कुंडल्या.

श्री शके १८०३ श्रावण कृ. ९ गुरुवार श्रीसूर्योदयात् गत घटी ४८ पळें ० समये जन्म.

जन्म-लग्न-कुंडली.



ही कुंडली एका दत्तक गेलेल्या श्रीमान् मनुष्याची असून तें दत्तविधान पुढें कोर्टांत सुमारें १५ वर्षांनीं रद्द झालें. त्यामुळें सन १९१६ च्या पुढील काल फार चिंताग्रस्त असा गेला. तथापि श्रीमंतीला साजेल इतकें उत्पन्न आजही असून आणखी बरेंच मोठें उत्पन्न मिळण्याची आकांक्षा आहे. वृषभ राशीचा गुरु आहे तोंपर्यंत आणखी मोठें उत्पन्न मोठमोठ्या अधिकाऱ्यांच्या सहाय्यानें व राजद्वारीं यश येऊन मिळालें पाहिजे अशी ग्रहस्थिति असून वय वर्षें ४९ मध्यें हा लाभ निश्चितपणें होणार यांत शंका नाहीं. कारण, सध्यां गुरु व शनि ह्या कुंडलींत प्रबल असून तेच हा लाभ देणार. मूळच्या गुरूशीं रवि आणि मंगळाचा पूर्ण शुभयोग घडणारा ह्या वर्षांतील काल हा श्रेष्ठफल देणारा आणि विशेष मोठ्या प्रमाणावर कायमचा लाभ उत्पन्न करणारा आहे. सदरच्या व्यक्तीच्या स्त्रियांच्या कुंडल्या खालीं दिल्या आहेत.

(शेवटचें पृष्ठ पहा.)

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

कामार्तमथनं वेश्या
यद्यादिन्दुर्न चेत्स्वभे ॥ १८ ॥
एकेनापि शशांको ग्रहेण
केमद्रुमे यदि न दृष्टः ॥
विनमतिराजयोगं
मलिनाचारः प्रसूतः स्यात्॥१९॥
भिक्षामटति व्याधैर्नीच-
क्षेगतैः सुदुःखितो मलिनः ॥
सकलमहीभृत्पुत्रः
परिभूतो जायते निःस्वः ॥२०॥
अत्यरिभवनं प्राप्तैः पश्चादि-
भिरस्तगैश्च गगनचरैः ॥
नाशं प्रयाति राजा यदि
रविचन्द्रौ न तुङ्गस्थौ ॥ २१ ॥
सचिवो दानवेन्द्रस्य
नीचांशे समवस्थितः ॥
संप्राप्तमतुलं राज्यं
नरैर्हापयते भुवम् ॥ २२ ॥
राजयोगाः समाख्याता-
स्तेषां भङ्गश्च दारुणः
परीक्ष्य यत्नतः प्राज्ञः
फलं ब्रूयाद्बलाबलात् ॥ २३ ॥
कमलभवनबन्धुः
कन्ययालिङ्गिताङ्ग ॥
स्वलिनि कुजसुरेऽड्यौ
चंद्रमा मेषसंस्थः ॥
न च यदि परिशेषै-
र्दृश्यते स्यात्स भूपः ॥
प्रचलितगजमेघच्छा-
दिताशानभोग्रः ॥ २४ ॥
इति कल्याणवर्मविरचितायां सारा-
वल्यां राजयोगभङ्गो नामाष्टत्रिंशोऽध्यायः।

द्वितीय स्थानस्थ ग्रहफलम्
(सारावली)

रविरविजभूमितनयाः
कुटुम्बसंस्था विलोकनाद्वापि ॥
कुर्वन्ति धनविनाशं क्षीणेन्दु-
निरीक्षिता विशेषेण ॥ १५।१२९॥
रविभौमो धनसंस्थौ
स्वग्दोषदारिद्र्यताकरौ कथितौ ॥
मन्दः कुरुते शुद्धो
महार्थयुक्तं बुधेक्षितस्तत्र ॥ १६ ॥
रविरपि विधनं जनयति
प्रमेक्षितः शस्यतेऽन्यदृष्टश्च ॥
सौम्याः कुटुम्बराशौ
बहु प्रकारं धनं दद्युः ॥ १७ ॥
बुधदृष्टस्त्रिदश गुरुः
कुटुम्बराशौ च निःस्वतां कुरुते॥
सोमतनयोपि शशिना
निरीक्षितो हन्ति सर्वधनम्॥१८॥
चंद्रोऽपि धनस्थाने
क्षीणोऽपि बुधेक्षितः सदा कुरुते॥
पूर्वार्जितार्थनाशं
निरोधमपि चान्यवित्तस्य ॥१९॥
शुक्रः कुटुम्बभवने
चन्द्रेण निरीक्षितः प्रधनदाता ॥
सौम्यग्रहेण दृष्टः स एव
धनदः सदा ज्ञेयः ॥ २० ॥
॥ इति धनचिन्ता ॥

लाभस्थानस्थ ग्रहफलम्.
(सारावली)

रविदृष्टे युक्ते वाऽप्याय
क्षेत्रे भवेत्सदा नृपतेः ॥
भवति धनं युद्धाद्यैश्चोर-
धनचतुष्पदाद्यैश्च ॥ ५८।१३३ ॥
स्त्रीजनहस्तिप्रायं शशाङ्क-
वर्गे शशीक्षिते युक्ते ॥
क्षीणे क्षयोऽथ पूर्णे
वृद्धिः स्यादायगे वृत्तेः ॥ ५९ ॥
हेमप्रवालभूषण माणिक्य -
धनं कुजे भवेदेवम् ॥
साहसगमनागमनैः
पात्रकशास्त्रैश्च वक्तव्यम् ॥ ६० ॥
प्राये बुधेऽपि वर्गे दृष्टे

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

युक्तेऽथवा भवेन्नित्यम् ॥
शिल्पादिलेख्यकार्यै
र्युक्तिप्रायं तथा सुतराम् ॥ ६१ ॥
नगरजनयोगभोगैः
ऋतुभिश्च तथा विशिष्टपुण्यैश्च ॥
हेमप्रायं वित्तं जीवे
पितुरङ्ग माकीर्णम् ॥ ६२ ॥
वेश्यास्त्रीसंयोगैर्गमना
गमनैर्धनं भवति पुंसाम् ॥
आये सितेऽपि चैवं
मुक्तारजतादि भूयिष्ठम् ॥ ६३ ॥
नगरपुरवृन्दयोगैः
स्थावरकर्मक्रियाभिरपि वित्तम्
लोहखरवृंदबहुलं
रविजेऽपि तथाऽस्य वर्गेच॥६४॥
एवं फलनिर्देशः सौम्यै
र्दृष्टे विशेषतो वाच्यः ॥
क्रूरैश्च समुपघातो
मिश्रैर्मिश्रस्तदा पुंसाम् ॥ ६५ ॥
सर्वग्रहयुत दृष्ट बहु-
प्रकारेण निर्दिशेद्वित्तम् ॥
बलवान्यस्तत्र भवेत्-
अतिरिक्तं सम्प्रयच्छाति च ॥६६॥
मित्रस्वगृहगतोर्धं स्वोच्चे
पूर्णं तथास्तगः किञ्चित् ॥
शत्रुगृहस्थश्चरणं
ददाति विहगस्तदाये तु ॥ ६७ ॥
आजन्मतो नराणां भवति
धनं निश्चितं यवनवृद्धैः ॥
क्षितिपति माण्डलिकानाम-
परिमितं प्राह लोकाक्षः ॥ ६८ ॥
॥ इत्यायचिन्ता ॥

भानौ क्षीणे चन्द्रो
व्ययभवने भूपतिर्हरति वित्तम् ॥
भौमेबुधसंदृष्टे बहु प्रकारोभवेन्नाशः
गुरुचन्द्र दानवेज्या
व्ययभवने वित्तपोषणं कुर्युः ॥
भूमितनयेन दृष्टा
भावाध्यायोक्तमन्यच ॥७०॥१३४॥
॥ इति व्ययचिन्ता ॥

राजयोग व धनयोग.

(सारावली.)

राजोपयोगिशास्त्रं
यस्मात्प्रभवो विशेषतस्तेषाम् ॥
संचिन्त्या नृपयोगा-
स्तानेवाहं प्रवक्ष्यामि ॥ १ ॥१३४॥
स्वोच्चत्रिकोणगृह-
गैर्बलसंयुतैश्च ॥
व्याद्यैर्नृपो भवति
भुपतिवंशजातः ॥
पंचादिभिर्जनपद-
प्रभवोऽपि सिद्धो
हीनैः क्षितीश्वरसमो
न तु भूमिपालः ॥ २ ॥ १३५॥
अशुभगगलवासैः
स्वोच्चगैः क्रूरचेष्टं ॥
कथयति यवनेंद्रो
भूपतिं विक्रमोत्थम् ॥
नतु भवति नरेंद्रो
जीवशर्मोक्तपक्षे ॥
भवति नृपतियोगैः
सत्कृतो राष्ट्रपालः ॥ ३ ॥
एष्विह भवन्त्यवश्यं
भूपतियोगेषु नीचकुलपुरुषाः ॥
तानग्रतः प्रवक्ष्ये
यथामतं शास्त्रकाराणाम् ॥ ४ ॥
स्वोच्चस्थै रविभौमसौर-
गुरुभिः सर्वैस्त्रिभिश्चैकगै ॥
लंग्ने षोडशवृद्धतापसगणैः
संदर्शिताः पार्थिवाः ॥
द्वाभ्यां चैकतमोदये
स्वभवने चन्द्रे पुनः षोडशाः॥
सर्वो नीचकुलोद्भवोऽपि
वसुधां पात्येव वाटीमिव ॥५॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

गणोत्तमे लग्ननवांशकोद्गतो
निशाकरश्चापि गणोत्तमेऽथवा॥
चतुर्ग्रहैश्चंद्रविवर्जितैस्तदा
निरीक्षितस्याद्नमोद्भवो नृपः॥६॥
उदयगिरिनिविष्टैर्मेष
संस्थैर्ग्रहेन्द्रैः॥
शशिरुधिरसुरेज्यै-
र्जायते पार्थिवेंद्रः॥
जलनिधिरशनायाः
पालकः सर्वभूमे॥
हतरिपुपरिवारः
सर्वतः फूत्करोति॥७॥
स्वोच्चे गुरावदनिजे
क्रियगे विलग्ने॥
मेषोदये च सकुजे
वचसामधीशे॥
भूपो भवेदिह स
यस्य विपक्षसैन्यं॥
तिष्ठेत जातु पुरतः
सचिवा वयस्याः॥८॥
निशाभर्ता चापे
भृगुतनयदेवेज्य सहितः॥
कुजः प्राप्तः स्वोच्चे
मृगमुखगतः सूर्यतनयः॥
विलग्ने कन्यायां
शिशिरकरसूनुर्यदि भवेत्
तदाऽवश्यं राजा भवति
बहुविज्ञानकुशलः॥९॥
स्वर्क्षे नक्षत्रनाथः स्फुटकर-
निकरालंकृतः प्राप्तलग्नो॥
द्यूने सोमस्य पुत्रो यदि
रिपुभवनं भास्करः संप्रयातः॥
पाताले दानवेज्यो गुरुरपि
गगने सौरभौमौ तृतीये॥
सद्भूपालो भवेद्यः शशिकरधवलं
चामरं राजलक्ष्मीम्॥१०॥१३६॥
शुक्रो घटे कुजो मेषे
स्वोच्चे देवपुरोहितः
यदि राजा भवेन्नूनं
स्वयशोधौतदिङ्मुखः॥१७॥
उदयति गुरुरुच्चे
तप्तहेमप्रभावो॥
हरितुरगनाथो
व्योममध्यावगाही॥
गवि शशिबुधशुक्रा
यस्य सूतौ नरस्य॥
स्वभुजविजितभूमिः
सर्वतः पार्थिवेंद्राः॥१८॥
धनुषि सुरेज्यः शशभृदुपेतो
मृगमुखसंस्थः क्षितितनयश्च॥
उदयति तुंगे सुररिपुवन्द्यः
शशितनयो वा यदि नृपतिःस्यात्
चापार्धे भगवान्सहस्रकिरण-
स्तत्रैव ताराधिपो॥
लग्ने भानुसुतोऽतिवीर्यसहितः
स्वोच्चे च भूनन्दनः॥
यद्येवं भवतिक्षितेरधिपतिः
सञ्चिन्त्यशौर्यं भयात्॥
शूरादेव नमन्ति यस्य रिपवो
दग्धाः प्रतापाग्निना॥२०॥
षष्ठं द्यूनमथाष्टमं शिशिरगोः
प्राप्ताः समस्ताः शुभाः॥
क्रूराणां यदि गोचरे न
पतिता मान्वालयाद्दूरतः॥
भूपालः प्रभवेत्स यस्य
जलधेर्वेलावनान्तोद्भवैः॥
सेनामत्तकरीन्द्र दान सलिलं
भृङ्गैर्मुहुःपीयते॥२१॥
न प्राप्नोति जरामाशु नो
भजत्यरितो भयम्॥
जातःस्यादधियोगेऽस्मिन्धृति
सौभाग्य सौख्यभाक्॥२२॥
वर्गोत्तमगते चन्द्रे
लग्ने वा चन्द्रवर्जिते॥
चतुराद्यैर्ग्रहैर्दृष्टे
जातो नरपतिर्भवेत्॥११॥
शिशिरकिरणे स्वोच्चे लग्ने
पयोम्बुनिधेः समे॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

घटधरगते भानोः पुत्रे
मृगाधिपगौ रविः ॥
अलिगृहगतो वाचां नाथः
स्फुरत्करराजितो ॥
यदि नरपतिः स्फीतश्रीक-
स्तदा बहुवाहनः ॥ १२ ॥
मृगे मन्दे लग्ने
कुमुदवनबन्धुश्च तिमिग- ॥
स्तथा कन्यां त्यक्त्वा
बुधभवनसंस्थः कुतनयः ॥
स्थितो नार्यां सौम्यो
धनुषि सुरमन्त्री यदि भवेत् ॥
तदा जातो भूपः
सुरपतिसमःप्राप्तमहिमा ॥ १३ ॥
उदयति मीने शशिनि नरेन्द्रः
सकलकलाढ्यःक्षितिसुत-उच्चे ॥
मृगपतिसंस्थे दशशतरश्मौ
घटधरगे स्याद्दिनकरपुत्रे ॥ १४ ॥
कुजे विलग्ने च शशी यदाऽस्ते
स्फुटांशुसम्भारविराजितांगः ॥
राजा तदा शत्रुभिरप्रधृष्यो
वेदार्थविद्वेतु शतानुवादैः ॥ १५ ॥
करोत्युत्कृष्टोद्यद्-
दिनकृद्भवाभीशुसहितः ॥
स्थितस्तादृग्भूपं
सकलनयनानन्दजननः ॥
अपूर्वोऽयं स्मृत्या
नयनजलसिक्तोऽपि सततं॥
रिपुस्त्री शोकाग्नि-
र्ज्वलतिहृदयेऽतीव सुतराम्॥१६॥
बुधः स्वोच्चे लग्ने
तिमियुगलगावीक्ष्य शशिनौ ॥
मृगे मन्दः सारो
जतुमगृहगो दानवसुहृत् ॥
य एवं कुर्यात्स क्षिति-
भृदहितध्वंसनिरतो ॥
निरा लोकं लोकं चलित
गजसङ्घूलरजसा ॥ २३ ॥
केन्द्रिगो महेन्द्रसचिवो

दिनकरसहितः ॥
कुंभगतोऽर्कजः शशधरः
खलु भवति वृषे ॥
वृश्चिकभे क्षितेस्तु तनयो
मिथुनगइन्दुसुतौ ॥
मेष लग्नसमुदये
यदि स तु मनुजपतिः ॥ २४ ॥
कार्मुके त्रिदशनायक मंत्री
भानुजो वणिजि चन्द्रसमेतः ॥
मेषगस्तु तपनो यदि लग्ने
भूपति भवति सोतुलकीर्तिः॥२५॥
स्वक्षोंत्केन्द्रेषु याते गुरुबुध-
भृगुजैर्मन्दमाग्वारयुक्तैः ॥
स्वोच्चे चन्द्रोऽधितिष्ठत्
जनयति नृपतिं कीर्तिं शुक्लीकृताशम्
अत्युच्चे लग्नसंस्थो रविरपि
भगवान्पार्थिवं क्रूरचेष्ट ॥
यातायातैः समस्तं चतुरु-
दधिजलं यस्य सेनाः पिबन्ति २६
उदक चर नवांशेषु षष्ठः
कमलरिपुः सकलाभिराममूर्तिः॥
उदयति विहगे शुभे स्वलग्ने
भवति नृपो यदि केन्द्रगा न पापाः ॥ २७॥
आपूर्णमण्डलकला
कलितं शशांकं ॥
पश्यन्ति शुक्रसुर-
पूजितसोमपुत्राः
लग्नाधिपोऽति बलवान्
पृथिवीश्वरः स्यात् ॥
वर्गोत्तमश्च नवमः
खलु चेद्विलग्ने ॥ २८ ॥
वर्गोत्तमे त्रिप्रभृतिग्रहेन्द्राः
केन्द्रस्थिता नो शुभसंयुताश्च ॥
नो रूक्षधूमो न विवर्ण देहाः
कुर्वन्ति राज्ञः प्रसभं प्रसन्नाः॥२९
एक एव खगः स्वोच्चे
वर्गोत्तमगतो यदि ॥
बलवान्मित्रसंदृष्टः
करोति पृथिवीपतिम् ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

शीर्षोदयर्क्षेषु गताः समस्ता
नीचारिवर्गे स्वगृहे शशांकः ॥
सौम्येक्षितोऽन्यूनकलो विलग्ने
दद्यान्महीं रत्नगजाश्व पूर्णाम् ॥
उपचयगृहसंस्थो
जन्मपो यस्य चन्द्रात् ॥
शुभगृहमथवांशे केन्द्र-
यातास्च सौम्याः ॥
सकलबलवियुक्ता ये
च पापाभिधानाः ॥
स भवति नरनाथः
शक्रतुल्यो बलेन ॥ ३२ ॥
अत्युच्चस्था रुचिरवपुषः
सर्वे एव ग्रहेन्द्रा ॥
मित्रैर्दृष्टा यदि रिपुदृशां
गोचरं न प्रयाताः ॥
कुर्युर्नूनं प्रसभमरिभि-
र्गर्जितैर्वारणाग्र्यैः ॥
सेनाश्वीयैश्चलति चलितै-
र्यस्य भूः पार्थिवेन्द्रम् ॥ ३३ ॥
परमोच्चे स्थितश्चन्द्रो
यदि शुक्रेण दृश्यते ॥
कुर्यान्महीपतिं पूर्णं
पापैरापोक्लिमोपगैः ॥ ३४ ॥
दृश्यते शुभदैः स्वकेन्द्र-
भवने मित्रैश्च पापैस्तथा ॥
युद्धे नो रिपुभिर्जितौ
बलयुतौ जन्मोदयर्क्षाधिपौ ॥
भूपस्याभिजराशिनाथ-
नवमे चन्द्रोदयेचेद्यशो ॥
यस्ये मस्तुतदानलुब्ध-
मधुपैश्चानुतर्दिशं गीयते ॥ ३५ ॥
उच्चराशिभवेद्धोरा
यस्यासौ कुरुते नृपम् ॥
स्वांशेऽथ सुहृदुच्चांशे
दृष्टः केन्द्रोपगैः शुभैः ॥३६।१३९॥
स्थितो मानोः पुत्रो
विरचितबलः पश्चिमार्धे ॥
मृगास्यविंसिंह शुक्रस्तुलिनी
रुधिरो मेषगः कर्णिणीन्दुः ॥
कुमारीं सम्प्राप्तो यदि
भवति वा शर्वरीनाथ सूनुः ॥
प्रजातो भूपालश्छदयति
महीमेकशुक्लातपत्राम् ॥ ३७ ॥
वर्गोत्तमस्वभवनेषु
गता ग्रहेन्द्राः ॥
सर्वे यदा रुचिर
रश्मिशिखाकलापाः ॥
उत्पद्यते जगति
सीममतीं धरित्रीं ॥
यः पालयेत्क्षिति-
पतिर्जित शत्रु पक्षः ॥ ३८ ॥
केन्द्रे विलग्ननाथः
सुहृद्भिरभिवीक्षितो विहगैः ॥
लग्नस्थिते च सौम्ये
भूपतिरिह जायते पुरुषः ॥ ३९ ॥
सुरपतिगुरुः सेन्दु लग्ने
वृषे समवास्थितो ॥
यदि बलयुतो लग्नेशश्च
त्रिकोणगृहं गतः ॥
रविशनिकुजैर्वीर्यो-
पेतैर्न युक्त निरीक्षितो ॥
भवति स नृपः कीर्त्या
युक्तो हताखिलकण्टकः ॥ ४० ॥
न नीच गृहसंस्थिता
न च रिपोर्गृहं संगताः ।
स्वराशिमथवांशकानुदय
गोच्चमंशं यदि ॥
कलाभि रति भूषिते
कुमुदषण्डबोधप्रदे ॥
सुहृद्भिरभिवीक्षिताः
क्षितिपतिं विदध्युर्ग्रहाः ॥ ४१ ॥
यो यः पूर्णं शिशिर-
किरणं प्रातवर्गोत्तमांशं ॥
सुरपथाधिंगगनगमनः
पश्यति स्वोच्चसंस्थम् ॥
स क्षोणीशः जनयति दशां
प्राप्य सौम्यः स्वकीयां ।

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

ख्यातं लोके यदि बलयुताः
कण्टकस्थानपापाः ॥ ४२ ॥
जन्मोदयभवनपती
बलसहितौ केन्द्रभेऽथ हिबुके वा
इन्दुर्जलगृहगश्चेन्त्रि-
कोणगो वा महीपालः ॥ ४३ ॥
स्वगृहे मित्रभागेषु
स्वांशे वा मित्रराशिषु ॥
कुर्वन्ति च नरं सूतौ
सार्वभौमं नराधिपम् ॥ ४४ ॥
परमोच्चगताः सर्वे
स्वोच्चांशे यदि सोमजः ॥
त्रैलोक्याधिपतिंकुर्यु-
र्देवदानववन्दितम् ॥ ४५ ॥
यस्योत्तरस्यां भगवान्वसिष्ठो
बृहस्पतिःप्रागपरे च भार्गवः ॥
अगस्त्यनामा खलु दक्षिणस्यां
स नष्टशत्रुश्च भवेन्नराधिपः ॥४६॥
शशी पूर्णः स्वांशं स्वगृहमथवा
स्वोच्चभं वा प्रयातो ॥
दिवःपातुर्मन्त्री दितिजगुरुणा
वीक्षितः केन्द्रसंस्थः ॥
रविर्लग्ने स्वांशं यदिवलयुतः
पश्यति स्यात्स भूपः ॥
प्रभङ्गं यस्यैमैश्चतुरुदधि
भूशल्लकीनामरण्यम् ॥ ४७ ॥
कुमुदगहनबन्धौ
वीक्ष्यमाणे समस्तैः ॥
गगनगृहनिवासै-
र्दीर्घजीवी नरःस्यात् ॥
फलमशुभसमुत्थं
नैव केमद्रुमोत्थं ॥
भवति मनुजनाथः
सार्वभौमो जितारिः ॥ ४८ ॥
उच्चाभिलाषी सविता त्रिकोणे
स्वर्क्षेशशी जन्मनि यस्यजन्तोः
सशास्ति पृथ्वीं बहुरत्नपूर्णां ॥
बृहस्पतिः कर्कटगे यदि स्यात्४९
तुंगेषु षड्विबुध
मार्गचरा उपेताः ॥
स्वांशे मयूखनिकरैः
परिपूरितांगाः ॥
उत्पादयन्ति कुलिशांकित-
पाणिपादं ॥
पृथ्वीपतिं सगरवेन
ययातितुल्यम् ॥ ५० ॥
शुभभवनसमेतैः
सौम्यभाग्येषु सौम्यैः ॥
स्फुटरुचिरकराद्यैः
प्रस्फुरद्भिर्विलग्ने ॥
रविमुषितमयूखैस्तैश्च
पापैरमिश्रैः ॥
गिरिगहननिवासी
तापसः स्यान्नरेंद्रः॥५१॥
शुभपणफरगाः शुभप्रदा
उभयगृहे यदि पापसंचयः॥
स्वभुजहतरिपुर्महीपतिः
सुरगुरुतुल्यमतिः प्रकीर्तितः ५२
विलग्ननाथः खलु लग्नसंस्थः
सुहृद्ग्रहे मित्रदृशां पथिस्थितः ॥
करोति नाथं पृथिवीतलस्य
दुर्वारवैरिघ्नमिहोदये शुभे॥५३ ॥
सम्पूर्णमूर्तिर्भगवान्शशांको
मेषांशकस्थो गुरुणा च दृष्टः ॥
नीचेन कश्चिन्न च वीक्षितोऽन्यैः
प्राहक्षीतीशं यवनाधिराजः॥५४॥
लग्नाच्छशी त्रिरिपु-
लाभनभः स्थलेषु ॥
सूतावखण्डितवपुः
पृथ्वीश्वरःस्यात् ॥
दृष्टः सुरेन्द्रगुरुणा
न च वीक्षितोऽन्यै ॥
जन्माधिपो दृढामगः
स्मरगोऽथवा स्यात् ॥ ५५॥१४१॥
विभ्रद्रश्मिकराल पूर्ण
परिधिर्नक्षत्रसम्पालकः ॥
स्तुङ्गांशे समवस्थितैश्च
सकलैः प्राप्तोक्षितो व्योमगैः ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

कुर्यांद्भूमिपतिं यशस्य
चरितं हरत्यश्वसैन्यं जगत् ॥
योऽथाऽऽच्छेषफणीन्द्र
तुल्यमखिलोर्वीभाराखिन्नःश्वसन् ॥
सुधामृणालोपमबिम्ब शोभितः
शशी नवांशे नलिनीप्रियस्य ॥
यदि क्षितीशो बहुहस्तिपूर्णः
शुभाश्चकेंद्रेषु न पापयुक्ताः ॥५७॥
शशिबुधसीधरांशैः
स्वांशकस्थैर्यं नीचै ॥
स्थैर्यगृहलजस्थै
र्नापि सूर्यप्रविष्टैः ॥
तनयभवनसंस्थे
वाक्पतौ चन्द्रयुक्ते ॥
भवति मनुजनाथः
कीर्तिशुक्लीकृताशः ॥ ५८ ॥
नीचारिवर्गरहितैः
विहगैस्त्रिभिस्तु ।
स्वांशोपगैर्बलयुतै
शुभदृष्टिदृष्टैः ॥
गोक्षीरशङ्खधवलो
मृगलाञ्छनश्च ।
स्याद्यस्य जन्मनि
स भूमिपतिर्जितारिः ॥ ५९ ॥
कुमुदगहनबन्धुं
श्रेष्ठमंशं प्रपन्नं ॥
यदिबल समुपेतः
पश्यतिव्योमचारी ॥
उदयभवनसंस्थः
पापसंघो न चैवं ॥
भवति मनुजनाथः
सार्वभौमः सुदेहः ॥ ६० ॥
जलचरराशिनवांशक-
इन्दौ तनुभवने शुभदः स्वकवर्गे॥
अशुभकरः खलु कण्टकहीनो ॥
भवति नृपो बहुवारणनाथः ॥
वर्गोत्तमे हिमकरः
सकलः स्थितोऽसौ ।
कुर्यान्महीपतिमपूर्व
यशोभि रामम् ॥
यस्याश्ववृन्द खुरघात
रजोभि भूतो ॥
भानुः प्रभातशशिनोऽनु
करोति रूपम् ॥ ६२ ॥
सर्वग्रहकृते योगे
चक्रवर्तीश्वरो भवेत् ॥
एकैकेन तथा जाता
मण्डलानामधीश्वराः ॥६२।१४२॥
एकोऽपि विहगः कुर्यात्
पञ्चमांशगतो नृपम् ॥
समस्तबलसंपन्न-
श्चक्रवर्तिनमेव च ॥ ६४ ॥
यदि पश्यति चन्द्रमसं
विबुधगुरुर्वृषभसंस्थितः प्रसवे ॥
भवति पृथिवीमुदग्रां
स्फुरन्मणिद्योतितदिगन्ताम् ॥६५॥
कुर्यात्तुंगेत्रिकोणे वा
स्वराशिस्थो विलोकयन् ॥
ग्रहस्तुषारकिरणं
निषादमपि पार्थिवम् ॥ ६६ ॥
स्वगृहे तृतीयभागे शशी स्थितः
पार्थिवं यदा कुरुते ॥
परिपूर्णबलः शुभदो
यदि प्रसूतौ महाराजम् ॥ ६७ ॥
स्वांशे दिवाकरो यस्य
स्वक्षेत्रे च क्षमाकरः ॥
स राजा गजदानौघ
शीकरोक्षित भूतलः ॥ ६८ ॥
लग्ने रविपुत्रसंयुते
देवेज्येऽस्तगतेनवोदिते ॥
दृष्टेऽसुरराज मंत्रीणा
ग्रामिणो नृपतिर्भवेदिह ॥ ६९ ॥
उदयेऽसुरमंत्रिवरो
गुरुमे गुरुदृष्टिपथं च गतः ॥
कुरुते नियतं सनृपं
यदि तुङ्गगतश्च बुधः ॥ ७० ॥
शुक्रभास्करेन्देवो
भावमेकमाश्रिताः ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

जीव दृष्ट मात्रकः
स्यात्तदा महीपतिः ॥ ७२ ॥
लग्नगाः सितशशाङ्कज भौमाः
सप्तमे शशिनिवाक्पतियुक्ते ॥
तिग्मरश्मितनये च दृष्टे
जायते पृथुशयाः पृथिवीशः॥७३॥
विबुधगुरुर्यदि भौमनवांशे
रुधिरनिरीक्षित पूर्णवलश्च ॥
जनयति कुत्सितजन्ममहीपं
क्रियपरिसंस्थितकर्मगतोऽर्कः ॥
तृतीयगाः शुक्र शशाङ्क भास्कराः
कुजोऽस्तसंस्थो नवमे बृहस्पतिः
गुणोत्तमो लग्न गृहांशकोद्गमो
यदा तदा हीनकुलो महीपतिः ॥ ७४ ॥
जीवो बुधो भृगुसुतोऽथ
निशाकरो वा ॥
धर्मे विशुद्धतनवः
स्फुटरश्मिजालाः ॥
मित्रैर्निरीक्षितयुता
यदि सूति काले ॥
कुर्वन्ति देवसदृशं
नृपतिं महान्तम् ॥ ७५ ॥
तपोगृहं यस्य भवेत्तदुच्चकं
ग्रहेण तेनाथ युतं निरीक्षितम् ॥
ग्रहद्वयं स्वोच्चगतं यदा भवेत्तदा
कुटुम्बीनियतं महीपतिः ॥ ७६।१४३ ॥
सुतभवने शशिदेवनमस्यौ
भवनपति प्रसमीक्षितदेहौ ॥
भृगुतनयो यदि मीनसमेतौ
भवति नृपः खलु कुत्सितवंशः ॥
चन्द्रस्त्रिपुष्करस्थः स्वोच्चे
वचसां पतिः सलक्ष्मीकम् ॥
उत्पादयति स्वामिन-
मुत्तमपात्रं समग्रभुवः ॥ ७८ ॥
केन्द्रस्वोच्चमुपेतः
सुरमंत्रीदशमगो यदा शुक्रः ॥
नूनं स भवति पुरुषः
समस्त पृथ्वीश्वरः स्यात् ॥७९॥
स्वक्षे शशी विपुल-
रश्मिशिखाकलापाः ॥
स्वांशे स्थिता बुध-
बृहस्पतिदानवेज्याः ॥
पातालगा दिनकरेण
निरीक्षिताश्च ॥
संसूचयन्ति नृपतिं
द्विजमुख्य जातम् ॥ ८० ॥
रविर्निभस्थः स्वत्रिकोणगोऽपि वा
स्वराशिसंस्थाः सितजीवचन्द्राः॥
तृतीयषष्ठायगताश्च चन्द्रात्
कुर्वन्ति गोपालमिह क्षितीशम् ॥८१॥
सप्तम भवने सौम्या
मित्रांशगताः सुहृद्भिरिह दृष्टाः ॥
उच्चे कुजो यदि नृपः
समस्तनृपपालकः श्रेष्ठः ॥८२॥
रविशशिबुधशुक्रैर्व्योम्नि
मित्रांशकस्थै ॥
नै च रिपुभवनस्थै-
र्नाप्यदृश्यैर्न नीचैः ॥
स तपसि भृगुपुत्रे
भूपतिः स्यात्प्रयाणे
गजमदजलसेकैः
लीयते यस्य रेणुः ॥ ८३ ॥
स्वोच्चे भानुः प्रकटितबलो
व्योममध्ये सजीवः ॥
शुक्रो धर्मे यदि बलयुतः
स्वं नवांशं प्रपन्नः ॥
लग्ने वर्गे शुभगगगो
राजपुत्रेण दृष्टः ॥
पृथ्वीपालो धवलित
जगत्स्यात्सितैः स्वैर्यशोभिः ॥
वृषे शशीलग्नगतः सपूर्णः
सितेन दृष्टो वणिजि स्थितेन ॥
बुधोऽपि पातालगतो यदि
स्यात्तदान्यजातो भवति क्षितीशः ॥८५ ॥
क्षमासुतः स्वोच्च
मुपाश्रितो यदा ॥
रवीन्दुवाचस्पतिभि र्निरीक्षितः
भवन्नरेन्द्रो यदि कुत्सितस्तदा ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

समस्तपृथ्वी परिरक्षणे क्षमः ॥ ८६।१४४ ॥
जायतेऽभिजिति यः शुभकर्मा ।
भूपतिर्भवति सोऽतुलवीर्यः ॥
नीचवेश्मकुलजोऽपि नरोऽस्मिन् ॥
राजयोग इति न व्यपदेशः ॥ ८७ ॥
गण्डान्तविष्टिपरिघव्यातिपातजात- ।
ताराधिपः समुदये यदि छत्तिकायाम् ॥
क्रीडेत्कृपाणफलकाहितचण्डवेग ॥
प्रोत्थापिताहितशिरोगुलिकाभिरीशः ॥८८॥
बुधोदये सप्तमगे बृहस्पतौ ।
चन्द्रे कुलीरे सुखराशिगेऽमले ॥
वियद्गते भार्गवनन्दने गृहे ।
प्रशास्ति पृथ्वीं मनुजो निराकुलः८९
एकान्तरगैर्विहगैः
षड्भिश्चक्रं क्षितीश्वरं कुर्यात् ॥
अत्रैव शुभे लग्ने
सकलमहीपालको नृपतिः ॥९०॥
अयमेव समुद्राख्यो
द्वौ लग्ने यदि संस्थितौ ॥
करोति भूभुजां नाथं
सौम्यैः केन्द्रेषु संस्थितैः ॥ ९१ ॥
निरन्तरं यदि भवनेषु षट्सु ।
ग्रहाः स्थिता उदयगृहात्समस्ताः ॥
स्वपंक्तिदन्नरपतिमेव कुर्युः ।
चतुष्टयन्नरपतिमन्त्रिणंच ॥ ९२ ॥
सुतसुखदुश्चिक्यगता
यदि कर्मणि कीर्तयन्ति यवनाद्याः ॥
बन्धुसुतार्थगजाद्यो
बहुभृत्यो जायते क्षितिपः ॥ ९३ ॥
कर्मास्तजलहोरासु
ग्रहाः सर्वे प्रतिष्ठिताः ॥
कुर्वन्ति नगरं नाम
यत्र स्यात्पृथिवीपतिः ॥ ९४ ॥
सुखतनुमदगाः शुभाः समग्राः ।
कुजरविरविजास्त्रिधर्मलाभसंस्थाः ॥
यदि भवति महीपतिःप्रशान्तो ॥
यवनपतिकृतोह्ययं महीपयोगः ॥९५॥
लाभधर्मस्थिताः
सौम्याः पापाः कर्मणि संस्थिताः॥

नृपतीनामयं योगो
भवेत्कलशसंज्ञितः ॥ ९६ ॥
त्रयो ग्रहा भ्रातृसुतायसंस्था-
स्तथा शुभौ द्वौ रिपुलग्नतौ च ॥
कलत्रलग्नं च गतौ च शेषौ
नृपस्य योगः खलु पूर्णकुम्भः ।९७।
सुविस्तरं नीचकुलोद्भवा मया ।
विचित्ररूपाः कथिताः क्षितीश्वराः॥
अतःपरं पार्थिववंशजन्मनां ।
भवन्ति योगा मुनिभिः प्रकीर्तिताः ॥
सिंहोदये दिनकरो मृगलांछनोजे ।
कुम्भस्थितो रविसुतः स्वगृहे सुरेज्यः ॥
स्वोच्चेऽपि भूमितनयः पृथिवीश्वरस्य ।
जन्मप्रदः सकललोकनमस्कृतस्य ॥ ९९ ॥
शुभे लग्नं याते
बलवति तथा धर्मराशिक्रमेण ।
शुभैः शेषैर्लग्नं
धनगृहमथ त्र्यायषट् कर्मगैश्च ॥
महीपालः श्रीमान्भवति
नियतं यस्य मातङ्गसंघाः ॥
प्रयाणे मेघानां स्रुतमदजलै
र्भ्रान्तिमुत्पादयन्ति ॥१००॥
सुरपतिगुरुर्बन्धुस्थाने
स्ववेश्मगतो यदा ॥
तुहिन किरणः सम्पूर्णांग-
स्तपः समवस्थितः ॥
त्रितनुभवनप्राप्ताः
शेषा ग्रहा यदि भूपतिः ॥
भवति धृतिमान्स्फीतः
श्रीकस्तथा बहुवाहनः ॥ १०१ ॥
स्वोच्चोदये कृतपदः कुमुदस्य बन्धुः
जीवोऽर्थगो वणिजिदानवपूजितश्च ॥
कन्याजसिंहगृहगाबुधभौमसूर्या ॥
श्चंद्रांशुनिर्मलयशा भवति क्षितीशः१०२
नक्षत्रनाथसहितः सविता नभस्थः
सौरिर्विलग्नभवने हिबुके सुरेज्यः ॥
देवारिपूज्यबुधभूमिसुतैः सलाभैः ।
ख्यातो महीपतिरिह-
स्वगुणैर्नरः स्यात् ॥ १०३।१४६ ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

मृगराशिं परित्यज्य
स्थितो लग्ने बृहस्पतिः ॥
करोत्यवश्यं नृपतिं
मत्तेभपरिवारितम् ॥ १०४ ॥
लग्ने भौमो रविजसहित-
स्तीक्ष्णरश्मिः खमध्ये ॥
वाचां स्वामी दशमगृहगो
भार्गवः सप्तमस्थः ॥
आये हेम्नः शिशिरकिरणो
बंधुराशिं प्रपन्नो ॥
यद्येवं स्याद्विपुलयशसो
जन्मभूपालकस्य ॥ १०५ ॥
न्यूनोऽपि कुमुदबन्धुः
स्वोच्चस्थः पार्थिवं करोति नरम्
किं पुनरखण्डमण्डलकर-
निकरप्रकटितदिग्न्तः ॥ १०६ ॥
लग्नं विहाय केन्द्रे
सकलकलापूरितो निशानाथः ॥
विदधाति महीपालं
विक्रमधनवाहनोपेतम् ॥ १०७ ॥
यदि पश्यति दानवार्चितं
वचसामधिपस्तदा भवेत् ॥
नृपतिर्बहुनागनायको
भुजगेंद्र इव प्रतापवान् ॥ १०८ ॥
दिवौकसां पतेर्मन्त्री
कुर्यात्पश्यन्बुधं नरम् ॥
शिरोभिः शासनं तस्य
धारयन्ति नृपाः सदा ॥ १०९ ॥
लग्नाधिपतिः स्वोच्चे
पश्यंस्मृगलांछनं नृपं कुरुते ॥
बहुगजतुरगबलौघैः
क्षपितविपक्षं महाविभवम् ॥ ११० ॥
इंदुः स्वोच्चे पश्यन्करोति
बुधभार्गवौ नरं नृपतिम् ॥
प्रणतारिपक्षमुक्तित-
यशसं सौभाग्यवंतं च ॥ १११ ॥
अधिमित्रांशगश्चन्द्रो
दृष्टो दानवमंत्रिणा ॥
अनिशं कुरुते लक्ष्मी

इव मिनं भूपतिं नरम् ॥ १११ ॥
स्वांशेऽधिमित्रभावे
वा गुरुणा यदि दृश्यते ॥
शशी महीपतिं कुर्या-
द्दिवसे नात्र संशयः ॥ ११३ ॥
जन्माधिपतिः केंद्रे
बलपरिपूर्णः करोति परमर्द्धिम् ॥
ब्राह्मणकुलेऽपि नृपतिं
किं पुनरवनीशसंभूतम् ॥ ११४ ॥
रविरप्यधिमित्रस्थो
यदि चन्द्रसमीक्षितः ॥
अङ्गदेशाधिपं कुर्यात्
अर्थसहितं नृपम् ॥ ११५।१४६ ॥
उच्चस्थः शशितनयः
कुमुदाकरबन्धुना च समधिगतः
जनयति मगधाधिपतिं
गजमदगन्धैर्वासितदिगन्तम् ॥
प्रधानबलसंयुक्तः
संपूर्णः शशलाञ्छनः ॥
एकोऽपि कुरुते जातं
नराधिपमरिंदमम् ॥ ११७ ॥
केन्द्रे विलग्ननाथः श्रेष्ठबली
मानवाधिपं कुरुते ॥
गोपालकुलेऽपि नरं किं
पुनरवनीश्वराणां च ॥ ११८ ॥
कर्कटसंस्थः केन्द्रे
बृहस्पतिर्दशमधामगः शशिनः॥
चतुरुदधिमेखलायाः
स्वामी भूमेर्भवति जातः ॥ ११९ ॥
मेषे सहस्ररश्मिः सह
शशिना संस्थितः करोतीशम् ॥
केरलकर्णाटान्ध्रद्राविडानां
चोलकस्यापि ॥ १२० ॥
उच्चस्थशिखशगुरुः
कैरवबनबन्धुलग्नमं प्राप्तः ॥
काश्मीरमण्डलभुवां
करोति पुरुषाधिपमवश्यम् ॥
तुङ्गाय स्वगृहोदयकण्टक
नवमेषु यस्य शुक्रगुरू ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

सोवश्य भवति नरो
राजांशसमुद्भवो नृपतिः ॥ १२२॥
दिक्स्थानकालादिबलैरुदाराः ॥
शुभाः पुनः केंद्रमुपागताश्च ॥
कुर्वन्ति पापैरविमिश्रचाराः ॥
पृथ्वीभुजं त्रिप्रभृति ग्रहेन्द्राः ॥
रवेर्द्वितीये बुधजीवभार्गवाः ॥
नचाशुभैर्दृष्टयुता न चार्किगाः ॥
स्फुरत्करौघस्फुटपिञ्जरीकृता नरं
प्रकुर्युरखिलमुद्रपालकम् ॥ १२४ ॥
कुन्दाब्जकाशधवलः परिपूर्णमूर्ति ।
जन्माधिपेन कविना शुभदेन दृष्टः ॥
स्त्रीमानभङ्गनिपुणं दयितं क्षपायाः ।
प्रख्यातकीर्तिसुनयं कुरुते नरेन्द्रम् ॥१२५॥
देवमंत्रीकुटुम्बस्थो
भार्गवेण समन्वितः ॥
जनयेद्वसुधापालं
निर्जितारातिमण्डलम् ॥ १२६ ॥
कारलयोगे जाता भवन्ति
पृथ्वीभुजो नरास्तेषाम् ॥
गजतुरगपतिविचालितरजो
वितानं भवेद्गगनम् ॥ १२७।१४८॥
कुजे विलग्ने तरणेश्च नन्दने ।
रसातले शुक्रबृहस्पतीन्दुजाः ॥
मृगोदये मन्दनवांशकस्थिते ॥
रसातलेशो भवतीह पार्थिवः ॥ १२८ ॥

धनभावफलम्

(संकेतानिधि)

धनाधिनाथे धनगेधनान्वितोऽ
भिमानवान् स्यात् कलयन्मृषानवान्
भवेत्कलत्रद्वितयं त्रयं वा
नच कश्चित्सुनुवरः पुरस्सरः ॥१॥
धनेश्वरविक्रमगेथवांबुगे
पराक्रमी स्यान्मतिमान्गुणाग्रणीः ॥
सदा सतृष्णस्त्रिदिवेशवेधकः
पराङ्गनारत्यभिसारपेशलः ॥ २ ॥
धनेश्वरे रातिभगे रिपोर्द्धनंजनः
समाप्नोति ततः क्षयं पुनः ॥
पटुत्वपाटच्चरता कर्कोत्कटः
कृतध्वजः स्याद्धिगुह्यलाञ्छनः।
धनेश्वरे कामगते चिकित्सको
निजान्यजायाभिगमेषु कोविदः॥
निजांगनाचारवधूविवान्यगा
प्रसूरसूरि व्यभिचारपारगा ॥ ४ ॥
धनेश्वरे मृत्युगृहं गते नरो
निधिं लभेत क्षितिगंधनं च वा ॥
स्त्रियाः सुखं ज्येष्ठसहोदरस्य वा
न सोश्नुते क्वापि परंत्वघंततः ॥ ५ ॥
धनेश्वरेदिष्टग आयगेथवा जनः
समुद्योगपरः पटुर्भवेत् ॥
धनीच बाल्ये बहुधारुजार्दितः
स यावदायुः परतः सुखान्वितः ॥ ६ ॥
धनादिनाथेऽम्बरसंगामिनि
स्मरप्रियोमानधनीच पंडितः ॥
अनेकदारैर्वसुभिः शुभैर्युतः
श्रितोर्थिभिः पुत्रसुखेन वर्जितः ॥७॥
धनाधिनाथे व्ययगेति साहसी
वृथाभिमानी धनधर्मविच्युतः
स्वजीवनं भूपजनप्रसादजं
सुखं न तस्य प्रथमात्मजन्मनः ॥ ८ ॥
धनेश्वरे लग्नगतेथ पुत्रगे नरः ॥
सदा स्यात्स्वकुटुंबकण्टकः ॥
सुनिष्ठुरोनंगविधिप्रचारभीः
परोपकार्यल्पधनश्चकैतवी ॥ ९ ॥
॥ इतिधनभावः ॥
लाभेशो यदि समवाप्ति गेहयातो
वाग्मिस्यात्पुरुषावरः सुखीसमृद्धः॥
पांडित्यं सकलविधंच सत्कवित्वं
सत्प्रीत्यैप्रतिदिनमस्यवृद्धिमेति ॥१॥
रिष्फस्थो यदि समवाप्ति गेहनाथः ।
संसर्गो यवनजनैस्तदा सदा स्यात्॥
कान्ताभीरमणपरःस्मरोत्थभावैः
कामार्त्तः क्षणमपिणोतिलंपटश्च ॥२॥
लग्नस्थो यदि समवाप्तिभावनाथः
स्याद्वक्ताधनसहितः कुतूहलात्मा ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

सर्वत्रविषममतिः प्रसन्नचेता
विख्यातः खलवियुतश्चसात्त्विकात्मा ॥३॥
लाभेशे सहजगतेऽथ वित्तयाते
तीर्थेषु प्रगुणाधिया कृतार्थभूतः ॥
सत्कार्येष्वपि कुशलोतिलोलचित्तः
स्वल्पस्वोऽनवरतशूलरोगदुःखी ॥ ४ ॥
लाभेशे सुखसुतभावगामिनि
स्याज्ज्ञानार्थो बहुविधसौख्यभाङ्मनुष्यः॥
धर्मात्माशुभपुमपत्यवीर्य-
संपत्संयुक्तः शुभफलसिद्धिभूषितश्च ॥५॥
लाभेशे रिपुभवनस्थिते नरो
सौख्याढ्योऽधिविधरुजार्दितः सदैव ॥
सर्वात्म्येनच सुखवानपि
प्रवासी गच्छेद्स्यतुपरसेवयैवकालः ॥ ६॥
लाभेशे मदगृहगेथरंध्रयातेनो
जीवेद्दिहवनितानरस्यकापि ॥
कामाद्यार्थैस्सहितः प्रकृत्युदारः
कौलीनेष्वनभिमतव्ययोऽप्रबुद्धः ॥ ७ ॥
लाभेशे नवमगतेथवांवरस्थे
भूपालैरपिपरिपूजितांघ्रिपद्मः ॥
धर्मात्माकृतिकुशलश्च सत्यवादी विख्यातो
धनसहितोऽपरोपकर्ता ॥ ८ ॥
॥ इति लाभेशफलम् ॥

अथ धनभावविचार

(मानसागरी)

पापाः सर्वे धनस्थाने
धनहानिकरामताः ॥
अन्यैः सौम्यैः शुभं सर्वं-
मृद्धिवृद्धिधनादिकम् ॥ १ ॥
क्रूराश्चतुर्षुकेन्द्रेषु
तथा क्रूरो धनेपिच ॥
दरिद्रयोगं जानीयां
स्वपक्षस्य भयंकरः ॥ २ ॥
अष्टमस्थो यदा भौमे
त्रिकोणे नीचगोरविः ॥
स शीघ्रमेव जातः स्या-
द्भिक्षाजीवीच दुःखितः ॥ ३ ॥
कन्यायां च यदा राहुः
शुक्रो भौमः शनिस्तथा ॥
तत्र जातस्य जायेत
कुबेरदधिकं धनम् ॥ ४ ॥
अर्केकेन्द्रे यदा चंद्रो
मित्रांशे गुरुणेक्षितः ॥
वित्तवाञ्ज्ञानसंपन्नो
जायते च तदा नरः ॥ ५ ॥
स्वक्षेत्रस्थो यदा जीवो
बुधः सौरिस्तथैवच ॥
तदा जातः सदीर्घायुः
संपत्तिश्च पदे पदे ॥ ६ ॥
लग्नं लग्नेशसंयुक्तं
यस्य जन्मनि जायते ॥
न मुंचति गृहं तस्य
कुलस्त्रिय इव श्रियः ॥ ७ ॥
चंद्रेण मंगलो युक्तो
जन्मकाले यदा भवेत् ॥
तस्य जातस्य गेहं तु
लक्ष्मीर्नैव विमुंचति ॥ ८ ॥ मा. सा.
मासमध्ये तु यत्संख्य-
दिवसैर्जायते पुमान् ॥
तत्संख्यवर्षभुक्तौ तु
लक्ष्मीर्भवति निश्चितम् ॥ ९ ॥ मा. सा.
भौमेंदू धनसंस्थौ
त्वग्दोषदरिद्रताकरौ कथितौ ॥
मंदस्तु धनस्थाने
महार्थयुक्तं बुधेक्षितःकुरुते ॥२४॥
रविरपि निधनं जनयति
यमेक्षितःशरयतेऽन्यदृष्टश्च ॥
सौम्याः कुटुंबसंस्था
बहुप्रकारं धनं दद्युः ॥२५॥ सा.व.
बुधदृष्टस्त्रिदशगुरुः
कुटुंबराशौ च विस्वतां कुरुते ॥
सोमसुतोपि शशिना-
निरीक्षितो हंतिसमस्तधनम्॥२६॥
चंद्रोपि धनस्थाने

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

पूर्वार्जितार्थनाशं
निरोधमपि चान्यवित्तस्य ॥ २७ ॥
शुक्रः कुटुंबराशौ
सूर्येंदुनिरीक्षितो धनं दाता ॥
सौम्यगृहे शुभदृष्टः
स एव धनदः सदा ज्ञेयः२८सा.व.
धनस्थानगते जीवे
धनी भवति बालकः ॥
बुधस्तत्रैव भोगी स्यात्
शुक्रे भूमिपतिर्भवेत् ॥ २९ ॥
ग्रंथांतरे.
धनस्थाने यदा चंद्रः
पंचमस्थो यदा रविः ॥
तदा धनक्षयं विद्याद्-
दशवर्षाणि पंच च ॥ ३० ॥ ग्रं.
स्वोच्चे बुधे तनुगते स सितेम्बरेऽब्जे
सेऽज्ये मदे च सुत आर्क्यसृजो नृपालः॥
चेदम्बराय तनुगाविधुमंदपुज्या
द्वारीधनं रविसितौ हिबुके धनी स्यात्
—संकेतनिधौ.
गृहे स्वोच्चे केंद्रे
नरपतिसमः स्यात्समुदिते ॥
तनोरर्के ज्यौचेत्
सुतभवनगौ शास्त्रधनवान् ॥
बलीसौम्यो लग्ने
सधनपतिकेन्द्रे च शुभकृत्-
खलः षष्ठे केन्द्रे
स शुभ इह विद्यार्थसहिता ॥३१॥
—संकेतनिधौ.
तैलुंगतोविधुतौबुनि ४.वारविः-
सुखपदरजनकाद्दविणप्रदः ॥
यदि तनौ स दिवाकरखे १० ऽरोऽ-
धिपतियोर्गद्दशःपितृकोषवान् ॥३३॥
—उदयभास्करे.
हरि ५ बुधो यदि वा घट ११ वाक्पति-
र्वपुषित तत्पुरुषत्रयजं धनम् ॥
समृदुचेद्धनभेत्यधिकारवद्दह्रु-
स्तदास्यवधूर्धनभृद्भवेत्॥३४॥ उ.भा.
यदि धनांत्यपतीर १२त्रिक ६।८।१२
गौसितांगपयुतौ च तदानगनक्षतिः॥
यदि विधुःसलितःस खलो धने
विनयनो यदि सेंदुभृगुस्त्रिके ॥ ३५ ॥
निशितदांधवतार्कसितान्वित-
स्तनुपतिर्जननांधकरस्तदा ॥
पितृसुताऽनुजमातृकुटुंबिनी
पतयएवमिताहि तथा फलाः ॥३६॥
द्वादशे लग्नतो मीनगश्चेद्रविर्द-
क्षनेत्रार्तिकृद्राात्रिपोऽन्वाक्षि हा ॥
पंचमेस्तंगतश्चेत्कुजोविसितः
स्यात्तदाचक्षुषाकाणएवस्फुटम् ॥३७॥
सिंहलग्ने सितो वा यमो वा व्यये
नेत्रपीडाकरौ मानवानां मतौ ॥
स्वव्ययार्यष्टमेषुक्रमाद्भूमिजार्कीन्दु
सूर्येषुतत्तद्रजाक्ष्णोः क्षयाः ॥ ३८ ॥
संकेतनि०
सहस्रनाथो दिनपः प्रदिष्टो
लक्षाधिपो रात्रिकरःसदैव ॥
शताधिपो भूतनयस्तथैव
कोटीश्वरो चंद्रसुतः सदैव ॥ ३९ ॥
यवनजातके.
सर्वाधिराजः सुरराजमंत्री
शुक्रोथशंखं शनिरल्पतुल्यः ॥
स्वतुंगगाः स्युर्यदि सर्व एतत्
वर्थांतरालेह्यनुपाततः स्यात् ॥ ४० ॥
यवनजातके
पादोनं च बलं त्रिकोणगृहगे
स्वर्क्षेदलं च त्रये ॥
भांशाहाधिपमित्रमे च चरणो
मित्रे समर्क्षेऽष्टमः ॥ ४१ ॥
वित्तस्य भवने स्थैर्य्यं बुधे
भानुसमन्विते ॥
प्रियादलितवित्तं स्यात्
स्त्रीग्रहे पुरुषान्विते॥४२॥वीरजातके.

लाभभावफलम्.

(कुंडलीकल्पतरु.)

भवेद्भोगयुक्तो धनैश्चापि युक्त-
स्तथा कन्यकानां गणस्तस्य गेहे ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

भवेद्विद्यया तस्य गेहं गरिष्ठं
यदा बोधनो लाभभावं प्रयातः॥२२॥
भवेद्राजतुल्यः सुपुत्रैश्च युक्त-
स्तथा विद्यया सर्वदासक्तचित्तः॥
सुवस्त्रैः सुरत्नैर्भवे प्राप्तवित्तो
यदा देवपूज्यो नराणां च लाभे॥२३॥
सदा गीतनृत्यं धनं तस्य गेहे
सुकर्मा सुधर्मागमे तस्य चित्तम्
दृढं विद्यया ईश्वरे तस्य चित्तं॥
यदा भार्गवो लाभभावं प्रयातः॥२४॥
धनं सुस्थिरं दन्तिनस्तस्य गेहे
भयं चाग्निना जायते देहदुःखम्
न रोगा गरिष्ठास्तदङ्गे कदाचित्
यदा लाभगो मन्दगामी जनानाम्॥२५॥
भवेन्मानवो मानयुक्तः सदैव॥
प्रतापानलैस्तापयेच्छत्रुवर्गम्॥
सुतैः कष्टभाग्गोत्रचिन्ता सुयुक्तो
यदा सैंहिकेयो नराणां च लाभे॥२६॥
भवेत्पुत्रचिन्ता धनं तस्य गेहे
कथं स्यात्सुतानांच चिन्ता विशेषात्॥
भवेज्जाठरे तस्य वायुप्रकोपो
यदा केतवो लाभगाः स्युर्नराणाम्॥२७॥
गणो वा स्थितिर्दृग् यदा लाभभावे
यदा गोधनस्यातुलाभस्तदानीम्॥
भवेत्काव्यशिल्पादियुक्तिप्रधानः
क्रयाद्विक्रयाद्वा धनं क्लीवतो वा १५
भवेद्धार्मिकः साधुलोकैः प्रसंगः
सुवर्णादि धातुर्भवेत्तस्य गेहे॥
नृपाणां सुमान्यः सुधान्यं प्रभूतं
यदा देवपूज्यस्य लाभे स्थिते स्यात् १६
धनं वैश्यवर्गात्तथा मार्गतश्च
ध्रुवं रौप्यरत्नादि मुक्ताफलेभ्यः॥
तथा श्वेतवस्तुगजाल्लाभभाक्स्याद्
यदा लाभभावे भृगोर्वर्गदृष्टिः॥१७॥
गजैर्नीललोहैर्महिष्यादितो वा
पुरग्रामदेशादि लाभैश्च युक्तः॥
यदा लाभगेहे शनिर्विद्यमानः
तथा वर्गदृष्टिर्भवेद्वा नराणाम्॥१८॥
सुगाने च नृत्ये तथा तालबन्धे॥

भवेत्सस्पृहः कीर्तियुक्तो नरःस्यात्॥
प्रतापी भवेत्तापयेत्सर्वं शत्रून्यदा
सूर्यनामा गतो लाभभावे॥१९॥
भवेन्मानयुक्तो धनैर्वाहनैर्वा
तथावस्त्ररूप्यादि कन्या प्रजा स्यात्
दृढा तस्य कीर्तिर्भवेद्भोगयोगो
यदा चन्द्रमा लाभभावं प्रयातः॥२०॥
कुजैकादशे पुत्रचिन्ता नराणां
भवेज्जाठरं गुल्मरोगादियुक्तम्॥
प्रतापो भवेत्सूर्यवत्तस्य नूनं
नृपस्तुल्यता वा श्रमस्तस्य देहे॥२१॥
सुवर्णं सुरत्नं क्रयं धातुचिंतां
तथा संग्रहं धान्यजं गोधनाढ्यम्
सुशाल्यं कुटुम्बं ततः शत्रुभाग्यं
ततो भ्रातृशत्रुं सुताश्वाशुरं वा १
तथा वैरिपन्थाद्दशां वैरिगुप्तं
तथा कांसकं रुद्रादिक्सुस्वरं वा॥
व्ययं बन्धनं सोदरस्य ध्रुवं वै
ततो सोदरं पुत्रमित्रं विशेषात् २
रिपूणां वधं वै तथा स्त्रीसुतानां
परं नाशनं शालकस्यापि शत्रुम्
तथा पितृविद्याधनं प्राप्तिकं वा
विचार्यं धने धीमतां बुद्धियोगात्॥३॥
धने काव्यपेयो नराणां मुखे वै
भवेल्लाञ्छनं तैलजं तस्य वक्त्रे
स सौम्ये रवौ तत्र सेवापरः स्याद्
धनं न स्थिरं वै प्रियादुःखभाक् स्यात्॥
शनिः सैंहिकेयो धने स्त्रीगृहं चेद्
धनं नश्यते तस्य गान्धर्वनाट्यैः
तथा कुट्टिनीगायनैश्चारणैर्वा
स भौमे बुधे नामनं रक्तपापैः॥५॥
धने क्रूरखेटा मुखे वाथ नेत्रे तथा
दक्षिणांसे तथा कर्णके वा॥
भवेद्घातपातोऽथवा वै व्रणं स्याद्
यदा सौम्यदृष्टं न युक्तं धनं चेत्॥६॥
यदा राहुमन्दौ धने संगृणी स्यात्॥
स चन्द्रे सशीतस्तथा सन्निपातः॥
तथा दन्तबाधं हृदेतत्र रोगं
यदा राहुकेतुर्भवेतां धने वा॥७॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

क्षीणोपिबुधवीक्षितःसदा कुरुते ॥
सजीवे धने चन्द्रबिम्बं सुखं स्यात्
सशुक्रे भवेत्पुण्डरीकं च नेत्रम् ॥
स केतौ सुदीर्घं सुखं कल्पनीयं
शुभैः शोभनं दुष्टखेटैश्च निन्द्यम् ॥८॥
धने यस्य सूर्ये कुटुम्बे कलिःस्याद्
धनं क्षीयते वै सचन्द्रेऽध्वगामी ॥
रविर्नोदित वर्गे यदा क्षीणदेहः ।
स भौमे कुटुम्बे भवेन्मूलछेत्ता ॥ ९ ॥
धने बोधने वक्ति माधुर्यमिश्रं ।
धनं वर्धते बाहुतेजाः स भोगी ॥
भवेत्संसदि सिंहतुल्यः स वक्ता ।
यदान्यस्तदुक्तं न व्यर्थं विरुद्धम् १०
सजीवे धने काव्यकृच्चञ्चलं वै
धनं तस्य वर्गे विरोधस्तदानीम् ॥
परं शत्रवः प्रौढतां संमपन्नाः
सुरूपं तथा भामिनी रञ्जितोऽयम्११
सशुक्रे धने सुन्दरं तस्य वक्त्रं
वदेन्माधुरं बुद्धिमान्वीर्यशाली ॥
कुटुम्बे सुखं कामिनीकामकामी
क्रयी विक्रयी कोशजातं प्रभूतम् १२
धने पंगुना विद्यमाने सुखं किं
कुटुम्बात्तथा क्लेशमाहुर्जनानाम् ॥
न भोक्ता न वक्ता वदेन्निष्ठुरं वै
धनं लोहजातं न शत्रोर्भयं स्यात् १३
धने राहुणा वर्तमाने धनी स्यात्
कुटुम्बस्य नाशो भवेद् दुष्टखेटैः ॥
स्थितिर्विक्रयातस्तथा गोधनं वै
धनं वर्द्धते माहिषं शत्रुनाशः ॥१४॥
मतान्तरम्
धने मन्दगामी तदा काष्ठलोह-
तृणागारपाषाणजं तस्य वित्तम् ॥
तथा नीचविद्यानुरक्तः स राही
धने चर्मच्छाविविंसं च चौर्यम् १५
स मन्दो रविः शुक्रशुक्रो यदि स्यात्
तदा वै नराणां दरिद्रस्य योगः ॥
निधीन् शोषयेद्रुद्रदेवस्य सोऽय-
महो मानवानां धनं किं तदग्रे ॥१६॥
यदा मंगलो भानुना मन्दगेन
युतो वा धने नाशमायाति कोशः॥
परं क्षीणचन्द्रे युते तत्र नूनं
धनं क्षीयते चेद्युतो नाशुभैर्वा ॥१७॥
धने चन्द्रभौमौ धनं दूषयन्तौ
शनेर्दृष्टियोगाद् ध्रुवं मानवानाम् ॥
शनौ वा द्वितीये बुधेनापि दृष्टे
धनानां सुवृद्धिं वदेज्जन्मकाले ॥१८॥
धनेशा धने वेदशास्त्राववोधो
विपक्षेस्तदा द्रव्यप्राचुर्यकं स्यात् ॥
धने बोधने चन्द्रदृष्टौ धनानां
क्षयं क्षीणचन्द्रे धनं चान्द्रिदृष्टौ॥१९॥
धनं पूर्वजं दीयते नो नवीनं
स शुक्रे धने सौम्यदृष्टे धनं स्यात् ॥
यदा सौम्यखेटैर्युतो वा सुदृष्ट-
स्तदा वित्तवृद्धिं सशुक्रो विधत्ते २०
यदा धने निरूपिता
ग्रहाः सुयोगजास्ततः ॥
कुयोगवित्तनाशनं
स्वपाककालपाकदाः ॥२१ ॥
गजानां सुखं घोटकानां तथैव
सुवर्णादिकं रत्नजातं प्रभूतम् ॥
धनं पितृकानां तथा पुत्रपत्नी
सहोत्थस्य भाग्यं श्रुतेर्भाग्ययुक्तः ॥१ ॥
अरिष्टस्य लाभं तथा पत्निपक्षं
ततो वह्निकोणं मतेश्च प्रकाशम्॥
सुतस्यापि सौख्यं नराणां प्रतापो
विचार्यं च लाभे यथा संभवं तत् ॥ २ ॥
नृयानं तथा शास्यकायाश्च चिन्ता
तथा वामजङ्घासुहस्ता प्रदिष्टा ॥
वदेल्लाभभावे जनेभ्यो यथोक्ता
विचारो यदा जन्मकाले च प्रश्ने ॥३॥
यदैकादशे भार्गवो शशी वा
बुधश्चेत्तदानीं प्रजाः कन्यकानाम् ॥
गुरौ विद्यया पुत्रसौख्यान्वितःस्यात्
परं चान्यदृष्टं सुतं नो तदानीम् ॥ ४ ॥
स पापे च लाभे मृतापत्यमाहुः
परं वार्द्धके वा कदाचित्सुतः स्यात्
सुता वा भवन्ति तथा गर्भस्रावो
यदा लाभभावे न दृष्टिः शुभानाम् ॥ ५ ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

स चन्द्रः शनिश्चेद्यदा लाभभावे
तदा ते मृतः स्युः सुपुत्राश्च केचित् ॥
तथा विद्यमाना भवेयुश्च शश्वद्
वदेन्मिश्रिता मिश्रभावे नराणाम् ॥ ६ ॥
यदा सूर्यभौमौ सितेनाशु युक्तौ
तदा पुत्रकष्टं भवेत्पुत्रिका वा ॥
तथा स्त्रीग्रहाः कन्यकापत्ययोगं
सपापे सुप्रजानाशनं सुप्रयुक्तम् ॥७॥
यदा सूर्यभौमौ भवेतां च लाभे
भवेद्भग्नजानुस्तथा भग्नपादः ॥
तदा जङ्घकायां वदेद्घातपातं
विषैर्वन्हिभिः शस्त्रपादादि पादे ॥८॥
यदा मन्दपातौ भवेतां च लाभे
तदा काष्टपाषाणवृक्षादितो वा ॥
भवेत्पादपार्श्वादिके घातयुक्तस्तथा
सर्पशूलां च दंष्ट्रादिदुःखम् ॥ ९ ॥
यदा विक्रमैकादशे यत्रभावे
भवेत्क्रूरखेटस्तदा भाग्यशाली ॥
भवेत्पृच्छको वा जनुः कुण्डलीशो
विचारेण वाच्यं फलं कालयोगात् ॥ १० ॥
यदा सौम्यखेटोऽथवा पूर्णचन्द्रो
ध्रुवं लाभभावे तदा सर्वगावाः ॥
शुभाः संप्रदिष्टाः किमन्यैश्च खेटै-
र्धनं रत्नवस्त्रादिकं तस्य गेहे ॥ ११ ॥
यदा सूर्ययुक्तो दशा वीक्ष्यमाणो ॥
भवेल्लाभभावस्तदाभूपचौरैः ॥
कुले श्रृङ्गिघोटादितो लाभयुक्तो
भवेत्पराक्रमी सर्वसौख्यान्वितोऽयम् ॥१२॥
यदा चन्द्रमा लाभगो वै नराणां
परं तस्य वर्गोदशा वीक्ष्यमाणः ॥
तदा श्वादितः स्त्रीजनाज्जीवतो वा
नरः श्रीयुतो भाग्यवान्संप्रयुक्तः ॥ १३ ॥
यदा लाभभावे भवेन्मङ्गलोऽयं
तथा दृष्टिवर्गो भवेद्यस्य पुंसः ॥
तदा भूषणात्पात्रतो बाहुवीर्यात्
सुबुद्धेश्च योगाद् ध्रुवं तस्य लाभः ॥ १४ ॥

येथपर्यंत अनेक विविध ग्रंथांतील धनयोग-दारिद्र्ययोगविषयक मूळ श्लोक दिले. त्यापरून धनयोगकारक ग्रहस्थिति कोणती व दारिद्र्ययोग-कारक ग्रहस्थिति कोणती यावद्दलचें प्रत्येक ग्रंथ-काराचें मत कळून येईल.

यापुढील भाग प्रत्यक्ष वस्तुस्थितिविदर्शक प्रमाणभूत अशा कुंडल्यांचा होय. हा भाग फार महत्त्वाचा आहे. त्यांपैकीं प्रारंभ म्हणून खालीं एक महत्त्वाची कुंडली देत आहों.

(पुरुषजन्म.)

शके १७८३ पौष शु. ११

सू. ग. घ. ३८—७सुमारें.



(स्त्रीजन्म.)

शके १७९७ चैत्र शु. ७ सोमवार

सू. ग. घ. ५३ पळें ४५ जन्म.



वरील २ कुंडल्यांपैकीं पहिली कुंडली एका कोट्याधिशाची असून दुसरी त्यांच्या पत्नीची आहे. ह्या दोन्ही कुंडल्यांच्या मनुष्यास जन्मा-पासून आजतागायतपर्यंत द्रव्याच्या बाबतींत कसलीही काळजी नसून लाखो रुपयांची दरमहा प्राप्ति आहे. अशा तऱ्हेची विशेष धनयोगाच्या ह्या कुंडल्या आहेत.

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

फलज्योतिष ग्रंथांपैकीं निरनिराळ्या ग्रंथांत तन्वादिभावस्थित ग्रहांचीं फलें दिलेलीं असून प्रत्येक ग्रंथांत कांहींना कांहीं तरी विशेष प्रकारचें वैशिष्ट्य आहे. भृगुसूत्रावली व जैमिनीय सूत्र या लहानशा पण महत्वाच्या सूत्रात्मक ग्रंथांत दिलेलीं फलें बरींच महत्वाचीं असल्यानें तीं बाराही भावांचीं फलें खालीं देत आहों. या सूत्रांत पाठभेद बरेच आहेत व भृगुसूत्रेंही निरनिराळीं आहेत. असो.

रविभावफलम् ।

लग्ने रवौ फलम्—आरोग्यं भवति । पित्तप्रकृतिः नेत्ररोगी । मेधावी सदाचारी वा । ऊष्णोदरवान् । मूर्खः पुत्रहीनः । तीक्ष्ण बुद्धिः अल्पभाषी प्रवासशीलः सुखी । स्वोच्चे कीर्तिमान् । बलयुते निरीक्षणे वा विद्वान् । नीचे प्रतापवान् । ज्ञानद्वेषी,दरिद्रः अंधकः शुभदृष्टे न दोषः। सिंहे स्वांशे महाराजा । कुलीरे ज्ञानवान्। रोगी बुद्बुदाक्षः । मकरे हृद्रोगी । मीने स्त्रीजनसेवी । कन्यायां रवौ कन्याप्रजः दारहीनः कृतघ्नश्च । क्षेत्री शुभयुक्तः आरोग्यवान् । पापयुते शत्रुनीचक्षेत्रे तृतीये वर्षे ज्वरपीडा । शुभदृष्टे न दोषः। मंदारयुते द्वेषकारी, हीनकर्मा, विकलांगः शत्रुपीडा बंधभीतिश्च । राहुयुते कीर्तिहीनः। व्याधियुक्तो दारिद्र्यश्च । शनिदृष्टे पितृनाशः। कर्तरि दोषे भाग्यनाशः । गुरुशुक्रयुते भाग्यवृद्धिः । जनपालकः लोकनाथश्च । जीवदृष्टिर्विशेषः । मातुजीवयोगे पौत्रवान् । धने मीनेच पुत्रवान् ।

द्वितीये रविफलम्—मुखरोगी । पञ्चविंशतिवर्षे राजदण्डेन द्रव्यच्छेदः । उच्चे स्वक्षेत्रे वा न दोषः । पापयुते नेत्ररोगी । स्वल्पविद्वान् रोगी । शुभवीक्षिते धनवान् दोषादीन् व्यवहरतिनेत्रसौख्यम् । स्वोच्चे स्वक्षेत्रे वा बहुधनवान् । बुधयुते पव ७ वाक् । धनाधिपः । स्वोच्चे वाग्मी । शास्त्रज्ञः ज्ञानवान् नेत्रसौख्यं राजयोगश्च । नीचे पापयुते दारिद्र्यःपराज्ञसेवी रोगवान्।

तृतीये रविफलम्—बुद्धिमान् अनुजरहितः ज्येष्ठनाशः । पंचम वर्षे चतुरष्ट द्वादश वर्षे वा किञ्चित्पीडा । पापयुते क्रूरकर्ता । द्विभ्रातृमान् पराक्रमी । युद्धे शूरश्च । कीर्तिमान् निजधनभोगी । शुभयुते सोदरवृद्धिः । भावाधिपे बलयुते भ्रातृदीर्घायुः । पापयुते पापेक्षणवशान्नाशः । शुभवीक्षणवशाद्धनवान् भोगी सुखी ॥

चतुर्थे रविफलम्—हीनाङ्गःअहङ्कारी जनविरोधी उष्णदेही मनः पीडावान् । द्वाविंशद्वर्षे सर्वकर्मानुकूलवान् । बहुप्रतिष्ठासिद्धिः सत्पापदवीज्ञानशौर्यसंपन्नः धनधान्यहीनः । भावाधिपे बलयुते स्वक्षेत्रत्रिकोणे केन्द्रे लक्षणापेक्षया आन्दोलिकाप्राप्तिः पापयुते शापवीक्षणवशात् दुष्टस्थाने दुर्वाहनसिद्धिः क्षेत्रहीनः परगृहवासः ।

पञ्चमे रविफलम्—निर्धनः स्थूलदेही सप्तमे वर्षे पितृरिष्टवान् मेधावी अल्पपुत्रः बुद्धिमान् । भावाधिपे बलयुते पुत्रसिद्धिः । पापयुते वीक्षणवशाद्वा स्त्रीप्रजासमृद्धिः । राहुकेतुयुते सर्पशापात् सुतक्षयः । कुजयुते शत्रुमूलात शुभदृष्युते न दोषः । सूर्यशरभादिषु भक्तः। बलयुते पुत्रसमृद्धिः॥

षष्ठे रविफलम्—अल्पज्ञातिः। शत्रुवृद्धिः धनधान्य समृद्धिः। विंशतिवर्षे नेत्रवैपरीत्यं भवति । शुभदृष्युते न दोषः । अहिकाननपारकन्मंत्रसेवी । कीर्तिमान् शोकरोगी महोष्णदेही । शुभयुते भावाधिपे देहारोग्यम् । ज्ञातिशत्रुबाहुल्यम्।भावाधिपे दुर्बले शत्रुनाशः। पितृदुर्बलः ॥

सप्तमे रविफलम्—विवाहविलम्बनम् स्त्रीद्वेषी परदाररतः दारद्वयवान् । पञ्चविंशतिवर्षे देशान्तरप्रवेशः । अभक्ष्याभक्षणः विनोदशीलः दारद्वेषी । अशान्तबुद्धिः

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

स्यात्। स्वक्षे बलयुते एकदारवान्। शत्रुनीचवीक्षिते पापयुते वीक्षणैर्बहुदारवान्॥

अष्टमे रविफलम्— अल्पपुत्रः नेत्ररोगी। दशमे वर्षे शिरोव्रणी। शुभयुतेदृष्टे तत्परिहारः।अल्पधनवान् गोमहिष्यादिनाशः। देहे रोगः। ख्यातिमान्। भावाधिपे बलयुते इष्टक्षेत्रवान्। स्वोच्चे स्वक्षेत्रे दीर्घायुः॥

नवमे रविफलम्— सूर्यादिदेवताभक्तः धार्मिकः अल्पभाग्यः पितृद्वेषी सुतदारवान्।स्वोच्चे स्वक्षेत्रे तस्य पिता दीर्घायुः। बहुधनवान् तपोध्यानशीलः गुरुदेवताभक्तः। नीचारिपापक्षेत्रेपापैर्युते दृष्टे वा पितृनाशः। शुभयुते वीक्षणवशाद्वा पिता दीर्घायुः॥

दशमे रविफलम्—अष्टादशवर्षे विद्याधिकारेण प्रसिद्धो भवति द्रव्यार्जनसमर्थश्च। राजप्रियःसत्कर्मरतः राजशूरः ख्यातिमान्। स्वोच्चे स्वक्षेत्रे बलपरः कीर्तिप्रसिद्धः। तटाकक्षेत्रगोपुरादिब्राह्मणप्रतिष्ठासिद्धिः। पापक्षेत्रे पापयुते पापदृष्टिवशात् कर्मविघ्नकरः। दुष्कृतिः। अनाचारः दुष्कर्मकृत्पापी॥

एकादशे रविफलम्—बहुधान्यवान् पंचविंशतिवर्षे वाहनसिद्धिः। धनवाञ्जालद्रव्यार्जनसमर्थः प्रभुज्वरितः भृत्यजनस्नेहः। पापयुते बहुधान्यव्ययः।वाहनहीनः। स्वक्षेत्रे स्वोच्चे अधिकप्राबल्यम्। वाहनेशयुते बहुक्षेत्रे वित्ताधिकारः। वाहनयोगेन बहुभाग्यवान्॥

द्वादशे रविफलम्—षट्त्रिंशद्वर्षे गुल्मरोगी। अपात्रव्ययकारी पतितः धनहानिः गोहत्यादोषकृत् परदेशवासी। भावाधिपे बलयुते वा देवतासिद्धिः। शय्याखट्वाङ्गादिसौख्यम्। पापयुते अपात्रव्ययकारी सुखशय्याहीनः। षष्ठेशयुते कुष्ठरोगयुतः शुभदृष्टियुते निवृत्तिः। पापी रोगवृद्धिवान्॥ राज्याधिकार सेवकः। राजयोगी परोपकारी। मित्रकार्ये धननाशः॥

चन्द्रभावफलम्।

लग्ने चन्द्रफलम्। रूपलावण्ययुक्तश्चपलः व्याधिमाशः जलाच्चासौख्यः। पञ्चदशवर्षे बहुयात्रावान् मेषवृषभकर्कलग्ने चन्द्रे शास्त्रपरः। धनी सुखी नृपालः मृदुवाक् बुद्धिरहितः मृदुगात्रः बली। शुभदृष्टे बलवान्। बुद्धिमान् आरोग्यवान् वाग्जालकः धनी। लग्नेशबलरहिते व्याधिमान्। शुभदृष्टे आरोग्यवान्॥

धनस्थे चन्द्रफलम्—शोभनवान् बहुप्रतापी धनवान् अल्पसन्तोषी। अष्टादशवर्षे राजद्वारेण सेनाधिपत्ययोगः। पापयुते विद्याहीनःशुभयुते बहुविद्या धनवान्। एकनैव पूर्णचन्द्रेण सम्पूर्ण धनवान्। अनेक विद्यावान्॥

तृतीये चन्द्रफलम्—भगिनीसामान्यः वातशरीरी अन्नहीनः अल्पभाग्यः। चतुर्विंशतिवर्षे भाविरूपेण राजदण्डेन द्रव्यच्छेदः। गोमहिष्यादिहीनःपिशुनःमेधावी सहोदरवृद्धिः॥

चतुर्थे चन्द्रफलम्—राज्याभिषेकःअश्ववान् क्षीरसमृद्धिः धनधान्यसमृद्धः।मातृरोगी परस्त्री स्तनपानकरी।मिष्टान्नसम्पन्नः परस्त्रीलोलःसौख्यवान्। पूर्णचन्द्रेस्वक्षेत्रे बलवान् मातृदीर्घायुः क्षीणचन्द्रे पापयुते मातृनाशः। वाहनहीनः बलयुते वाहनसिद्धिः। भावाधिपे स्वोच्चे अनेकाश्वादि वाहनसिद्धिः॥

पञ्चमे चन्द्रफलम्—स्त्रीदेवतासिद्धिः भार्या रूपवती। क्वचित् कोपवती स्तनमध्ये लाञ्छनं भवति। चतुष्पादलाभः। स्त्रीद्वयंबहुक्षीरलाभःसत्वयुतःबहुश्रमोत्पन्नचिन्तावान् स्त्रीप्रजावान्। एकपुत्रवान्। स्त्रीदेवतोपासनावान् शुभयुते वीक्षणवशानुग्रहसमर्थः। पापयुते क्षीणवशादनुग्रहसमर्थः। पूर्णचन्द्रे बलवान् अन्नदानप्रीतिः अनेक बुध प्रसादैश्वर्यसम्पन्नः सत्कर्मकृत् भाग्यसमृद्धः राजयोगी ज्ञानवान्॥

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitized by eGangotri

षष्ठे चन्द्रफलम्—अधिक दारिद्र्यग्राही। षट्त्रिंशद्वर्षे विधवासङ्गमी तत्र पापयुते हीनपापकरः। राहुकेतुयुते अर्थहीनः। घोरः शत्रुकलहवान् सहोदरहीनः अग्निमांद्यादि रोगी । तटाककूपादिषु जलादिगण्डः। पापयुते रोगवान् । क्षीणचन्द्रे पूर्णफलानि। शुभयुते बलवान् अरोगी ॥

सप्तमे चन्द्रफलम्—मृदुभाषीपार्श्वेनेत्रः द्वात्रिंशद्वर्षे स्त्रीयुक्तः । स्त्रीलोल स्त्रीमूलेन ग्रन्थिशस्त्रादि पीडा । राजप्रसाद लाभः। भावाधिपे बलयुते स्त्रीद्वयम् । क्षीणचन्द्रे कलत्रनाशः । पूर्णचन्द्रे बलयुते स्वोच्चे एकदारवान् । भोगलुब्धः ॥

अष्टमे चन्द्रफलम्—अल्पवाहनवान् । नदीतटाकादिषु गण्डः । स्त्री मूलेन बन्धुजनपरित्यागी । स्वर्क्षे स्वोच्चे दीर्घायुः । क्षीणे वा बलयुते दीर्घायुः ॥

नवमे चन्द्रफलम्—बहुश्रुतवान् । पुण्यवान् तटाक गोपुरादिनिर्माणपुण्यकर्ता । पुत्रभाग्यवान् । पूर्णचन्द्रे बलयुते बहुभाग्यवान् । पितृदीर्घायुः । पापयुते पापक्षेत्रे भाग्यहीनः । नष्टपितृमातृकः ॥

दशमे चन्द्रफलम्—विद्यावान् पापयुते सप्तविंशतिवर्षे विधवासङ्गमेन जनविरोधी। अतिमेधावी। सत्कर्मनिरतः कीर्तिमान् दयावान् । भावाधिपे बलयुते विशेषसत्कर्मसिद्धिः । पापनिरीक्षिते पापयुते वा दुष्कृतिः कर्मविघ्नकरः ॥

एकादशे चन्द्रफलम्—बहुश्रुतवान् पुत्रवान् उपकारी । पंचाशद्वर्षे ऐश्वर्यबहुप्राबल्ययोगः गुणाढ्यः । भावाधिपे बलहीने बहुधनव्ययः बलयुते लाभवान् । लाभे चन्द्रे निक्षेपलाभः । शुक्रयुतेन नरवाहनयोगः बहुविद्यावान् । क्षेत्रवान् अनेकजनरक्षण भाग्यवान् ॥

द्वादशे चन्द्रफलम्—दुर्भोजनः दुष्कृत्यव्ययः कोपोपद्रवः व्यसन समृद्धिमान् स्त्रीरोगयुक्तः पतितः अङ्गहीनः । शुभयुते विद्वान् दयावान् पापशत्रुयुते पापलोकः शुभमित्रयुते श्रेष्ठलोकवान् ॥

भौमफलम् ॥

लग्ने भौमफलम्—देहे व्रणं भवति । दृढगात्रचौरबुभूषकः बृहन्नाभिः रक्तपाणिः शूरो बलवान् मूर्खः कोपवान् समानशौर्यः धनवान् चित्ररोगी क्रोधी दुर्जनः । स्वोच्चे स्वक्षेत्रे आरोग्यम् दृढगात्रवान् राजसन्मानकीर्तिः । दीर्घायुः। पापशत्रुयुते अल्पायुः स्वल्पपुत्रवान् वातशूलादिरोगः दुर्मुखः । स्वोच्चे लग्नर्क्षेधनवान् । विद्यावान् नेत्रविलासवान् । तत्र पापयुते पापक्षेत्रे पापदृष्टियुते नेत्ररोगः ॥

द्वितीये कुजफलम्—विद्याहीनः लाभवान् षष्ठाधिपेन युतःतिष्ठति चेन्नेत्रवैपरीत्यं भवति । शुभदृष्टे परिहारः स्वोच्चे स्वक्षेत्रे विद्यावान् । नेत्रविलासः । तत्र पापयुत क्षेत्रे पापदृष्टे नेत्ररोगः ॥

तृतीये कुज फलम्—स्वस्त्रीव्यभिचारिणी । शुभदृष्टे न दोषः अनुजहीनः । द्रव्यलाभः । राहुकेतुयुते वेश्यासङ्गमः भ्रातृद्वेषी क्लेशयुतः सुभगः अल्पसहोदरः । पापयुते पापवीक्षणेन भ्रातृनाशः उच्चे स्वक्षेत्रे शुभयुते वा भ्राता दीर्घायुः धैर्यविक्रमवान्। युद्धे शूरः । पापयुते मित्रक्षेत्रे धृतिमान् ॥

चतुर्थे कुजफलम्—गृहच्छिद्रम् । अष्टमे वर्षे पितृरिष्टं मातृरोगी । सौम्ययुते परगृहवासः । शरीरकष्टः क्षेत्रहीनः । धनधान्य हीनः जीर्णे गृहवासः। उच्चे स्वक्षेत्रे शुभयुते मित्रक्षेत्रे वाहनवान् क्षेत्रवान् मातृदीर्घायुः । नीचर्क्षे पापमृत्युयुते मातृनाशः । सौम्ययुते वाहनवान् । बन्धुजनद्वेषी स्वदेशपरित्यागी वस्त्रहीनः

पंचमे कुज फलम्—निर्धनः पुत्राभावः दुर्मार्गी राजकोपः षष्ठवर्षे आयुधेन किञ्चिद्दण्डकालः दुर्वासनज्ञानवान् । मायावादी । तीक्ष्णधीः । उच्चे स्वक्षेत्रे पुत्र-

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

समृद्धिः अन्नदानप्रियः राज्याधिकारयोगः शत्रुपीडा । पापयुते पापक्षेत्रे पुत्रनाशः । बुद्धिभ्रंशादिरोगः । रन्ध्रेशे पापयुते पापी। वीरः । दत्तपुत्रयोगः ॥

षष्ठे कुजफलम्— प्रसिद्धः । कार्यसमर्थः शत्रुहन्ता पुत्रवान् सप्तविंशतिवर्षे कन्यकाश्वादियुत ऊढवान् शत्रुक्षयः पापर्क्षे पापयुते पापदृष्टे पूर्णफलानि । वातशूलादिरोगः । बुधक्षेत्रेकुष्ठरोगः । शुभदृष्टे परिहारः ॥

सप्तमे कुजफलम्--स्वदारपीडा पापर्क्षे पापयुते स्वर्क्षे स्वदारहानिः । शुभयुते जीवति पत्यौ स्त्रीनाशः । विदेशवासः । उच्चमित्र स्वक्षेत्रे शुभयुते पापक्षेत्रे ईक्षणवशात् कलत्रनाशः । अथवा चोरव्यभिचारमूलेन कलत्रान्तरंदुष्टस्त्रीसङ्गः । भगचुम्बनवान् । मद्यपानप्रियः । मन्दयुते दृष्टे शिश्नचुम्बनः । केतुयुते रजस्वलास्त्री सम्भोगी । तत्र शत्रुयुते बहुकलत्र नाशः । अहङ्कारी, शुभदृष्टे न दोषः ॥

अष्टमे कुजफलम्--नेत्ररोगी मध्यमायुः पित्रारिष्टं मूत्रकृच्छ्ररोगः। अल्पपुत्रवान् वातशूलादि रोगः दारसुखयुतः । शुभयुते देहारोग्यवान् दीर्घायुः । मनुष्यादि वृद्धिः। पापक्षेत्रे पापयुते ईक्षणवशाद्वातक्षयादि रोगः मूत्रकृच्छ्राधिक्यं वा । मध्यमायुः । भावाधिपे बलयुते पूर्णायुः ॥

नवमे कुज फलम्---पित्र्यरिष्टम्। भाग्यहीनः । उच्चे स्वक्षेत्रे गुरुदारगः ॥ देशांतरे भाग्ययोगः ॥

दशमे कुजफलम्--जनवल्लभः । भावाधिपे बलयुते भ्राता दीर्घायुः । विशेष भाग्यवान् ध्यानशीलवान् गुरुभक्तियुतः । पापयुते कर्मविघ्नवान् शुभयुते शुभक्षेत्रे कर्मसिद्धिः । कीर्तिप्रतिष्ठावान् अष्टादशे वर्षे द्रव्यार्जनसमर्थः सर्वे समर्थः । दृढगात्रः चोरबुद्धिः पापयुते पापक्षेत्रे कर्मविघ्नकरः दुष्कृतिः भाग्येशकर्मेशयुते महाराज यौवराज्ये पट्टाभिषेकवान् । गुरुयुत गजान्तैश्वर्यवान् । भूसमृद्धिमान्॥

एकादशे कुजफलम्--बहुकृत्यवान् धनी स्वगुणैरमितलाभवान् । क्षेत्रेशयुते राजाधिपत्यवान् । शुभद्वययुते महाराजाधिपत्ययोगः भ्रातृवित्तवान् ॥

द्वादशे कुजफलम्---द्रव्याभावः वातपित्तदेहः । पापयुते दाम्भिकः ॥ शत्रुयुक्तः राजवंधन द्रव्यनाशादि योगकरः दुर्बुद्धिमान्

बुधफलम् ।

लग्ने बुधफलम्---विद्यावान् विवाहादि बहुश्रुतवान् अनेकदेशे सार्वभौमः मंत्रवादी पिशाचोच्चाटन समर्थः मृदुभाषी विद्वान् क्षमी दयावान् । सप्तविंशतिवर्षे तीर्थयात्रायोगः बहुलाभवान् बहुविद्यावान् । पापयुते पापक्षेत्रे देहे रोगः पित्तपांडुरोगः॥ शुभयुते शुभक्षेत्रे देहारोग्यम् । स्वर्णकांतिदेहः ज्योतिःशास्त्रपाठितः अङ्गहीनः सज्जनद्वेषी नेत्ररोगी । सप्तदशवर्षे भ्रातृणामन्योन्यकलहः ॥ वंचकः उच्चस्वक्षेत्रे भ्रातृसौख्यम् । श्रेष्ठलोकं गमिष्यति । पापयुते पापदृष्टयुते नीचर्क्षे पापलोकं गमिष्यति । शय्यासुखवर्जितः क्षुद्रदेवतोपासकः। पापमन्दादियुते वामनेत्रे हानिः षष्ठेशयुते नीचेश युते वा न दोषः । अपात्रव्ययवान् । पापमतिः। शुभयुते निश्चयेन् धनधान्यादिमान् धार्मिकबुद्धिः । अस्त्रवित् गणितशास्त्रज्ञः सौख्यवान् तर्कशास्त्रवित् दृढगात्रः ॥

द्वितीये बुधफलम्---पुत्रसमृद्धिः । वाचालकः वेदशास्त्रविचक्षणः सङ्कल्पसिद्धया संयुतः धनी गुणाढ्यः सद्गुणी पञ्चदशवर्षे बहुविद्यावान् धनवान् । बहुलाभप्रदः । पापयुते पापक्षेत्रे अरिनीचगे विद्याहीनः । क्रूरत्ववान् पवनव्याधिः।शुभयुतिवीक्षणाद्धनी । विद्यावान् । गुरुयुते वीक्षिते वा गणितशास्त्राधिकारेण संपन्नः॥

तृतीये बुधफलम्—भ्रातमान् बहु-

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

सौख्यवान् । पंचदशवर्षे क्षेत्रपुत्रयुतः। धनलाभवान् । सद्गुणशाली । भावाधिपे बलयुते; दीर्घायुः धैर्यवान् । भावाधिपे दुर्बले भ्रातृपीडा भीतिमान् । बलयुते भ्राता दीर्घायुः ॥

चतुर्थे बुधफलम्---हस्तचापल्यवान् धैर्यवान् विशालाक्षः पितृमातृसौख्ययुतः। ज्ञानवान् सुखी । षोडश:वर्षे द्रव्यापहाररूपेण बहुलाभप्रदो भवति । गुरुशुक्रशनियुते अनेकवाहनवान्। भावाधिपे बलयुते आन्दोलिका प्राप्तिः । राहुकेतुशनियुते वाहनारिष्टवान् । क्षेत्रसुखवर्जितः बन्धुकुलद्वेषी कपटी ॥

पञ्चमे बुधफलम्---मातुलगण्डः मात्रादिसौख्यं पुत्रविघ्नं मेधावी मधुरभाषी बुद्धिमान्। भावाधिपे पापयुते बलहीने पुत्रनाशः । अपुत्रः;दत्तपुत्रप्राप्तिः पापकर्मी मन्त्रवादी ॥

षष्ठे बुधफलम्---राजपूज्यः विद्याविघ्नः दाम्भिकः विवादशूरः त्रिंशद्वर्षे बहुराजद्वेषी भवति । बहुश्रुतलेखकः। कुजर्क्षे नीलकुष्ठादिरोगी । शनिराहुयुते केतुयुते वातशूलादि रोगी ज्ञातिशत्रुकलहः। भावाधिपे बलयुते ज्ञातिप्रबलः अरिनीचर्क्षे ज्ञातिक्षयः ॥

सप्तमे बुधफलम्---मातृसौख्यं अश्वारूढो धर्मज्ञः उदारमतिः दिगन्तविद्याश्रुतकीर्तिः राज्यपूज्यः तत्र शुभयुते चतुर्विंशतिवर्षे आन्दोलिका प्राप्तिः । कलत्रमतिः। अभक्ष्यभक्षणः। भावेशे बलयुते एकदारवान्। दारेशे दुर्बले पापे पापर्क्षे कुजादियुते कलत्रनाशः । स्त्रीजातके पतिनाशः कलत्रं कुष्ठरोगी । रूपहीनः ॥

अष्टमे बुधफलम्--आयुःकारकः बहुक्षेत्रवान् । सत्पुत्रवान् । पञ्चविंशतिवर्षे अनेक प्रतिष्ठासिद्धिः कीर्तिप्रसिद्धः भावाधिपे बलयुते पूर्णायुः । अरिनीच पापयुते अल्पायुः अथवा उच्चे स्वक्षेत्रे वा शुभयुते पूर्णायुः ॥

नवमे बुधफलम्---बहुप्रजासिद्धिः वेद शास्त्रविशारदः सङ्गीतपाठकः दाक्षिण्यवान् धार्मिकः प्रतापवान् बहुलाभवान् पितृदीर्घायुः । पापयुते पापक्षेत्रे पापविक्षण वशात्पितृनाशः । पितृक्लेशकरः गुरुद्वेषी। भावाधिपे बलयुते पितृदीर्घायुः । तपोध्यानशीलवान् ॥

दशमे बुधफलम्---सत्कर्मसिद्धिः धैर्यवान् बहुलकीर्तिमान् बहुवित्तवान् अष्टाविंशतिवर्षे नेत्ररोगवान् । उच्चस्वक्षेत्रे गुरुयुतेऽग्निष्टोमादिबहुकर्मवान् । अरिमूढपाप युते कर्मविघ्नवान् दुष्कृतिः अनाचारः ॥

एकादशे बुधफलम्---बहुमङ्गलप्रदः । अनेक प्रकारेण धनवान् एकोनविंशतिवर्षादुपरि क्षेत्रपुत्रधनवान् दयावान्. पापर्क्षे पापयुते हीनमूलेन धनलोपः । उच्चस्वक्षेत्रे शुभयुते शुभमूलेन धनवान् ॥

द्वादशे बुधफलम्---ज्ञानवान् । वितरणशाली । पापयुते चञ्चलचित्तः । नृपं जनद्वेषी । शुभयुतेन धर्ममूलेन धनव्ययः । विद्याहीनः ॥ उच्चे स्वक्षेत्रे लोकधुरीण कार्यकर्ता च ॥

गुरुफलम् ।

लग्ने गुरुफलम्---स्वक्षेत्रे शब्दशास्त्राधिकारी । त्रिवेदी बहुपुत्रवान् सुखी चिरायुः ज्ञानवान् । उच्चे पूर्णफलानि। षोडशवर्षे महाराजयोगः । अरिनीच पापानां क्षेत्रे पापयुते वा नीच कर्मवान् । मनश्चंचलत्ववान् । मध्यायुः पुत्रहीनः स्वजनपरित्यागी कृतघ्नः गर्विष्ठः बहुजनद्वेषी संचारवान् पापक्लेशभोगी ॥

द्वितीये गुरुफलम्---धनवान् बुद्धिमान् उच्चभाषी षोडश वर्षे धनधान्यसमृद्धिः । बहुप्राबल्यवान् उच्चस्वक्षेत्रे षनुषि द्रव्यवान् । पापयुते विद्याविघ्नः चोरवञ्चनवान् दुर्वचनः अनृतप्रियः । नीचक्षेत्रे पापयुते मद्यपानी भ्रष्टः । कुलनाशकः कलत्रान्तरयुक्तः पुत्रहीनः ।

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

तृतीये गुरुफलम्---अतिलुब्धः भ्रातृवृद्धिः दाक्षिण्यवान् संकल्पसिद्धिकरः। बन्धुदोषकरः अष्टत्रिंशद्वर्षे यात्रासिद्धिः। भावाधिपे बलयुते भ्रातृदीर्घायुः भावाधिपे पापयुते भ्रातृनाशः। धैर्यहीनः जडबुद्धिः दारिद्र्ययुक्तः॥

चतुर्थे गुरुफलम्---सुखी क्षेत्रवान् बुद्धिवान् क्षीरसमृद्धः सन्मानसः मेधावी। भावाधिपे बलयुते भृगुचन्द्रयुक्ते शुभवर्गेण नरवाहनयोगः। बहुक्षेत्रः अश्ववाहनयोगः गृहविस्तारवान्। पापयुते पापिनः दृष्टिवशात्। क्षेत्रवाहनहीनः। परगृहवासः क्षेत्रहीनः मातृनाशः बन्धुद्वेषी॥

पञ्चमे गुरुफलम्---बुद्धिचातुर्यवान् विशालकार्यकरः वाग्मी प्रतापी अन्नदानप्रियः कुलप्रियः अष्टादशवर्षे राजद्वारेण सेनाधिपत्ययोगः। पुत्रसमृद्धिः भावाधिपे बलयुते पापक्षेत्रे ओंदिनीचगे पुत्रनाशः एकपुत्रवान्। धनवान्। राजद्वारे राजमूलेन-धनव्ययः। राहुकेतुयुते सर्पशापात्सुतक्षयः। शुभदृष्टेपरिहारः॥

षष्ठे गुरुफलम्---शत्रुक्षयः ज्ञातिवृद्धिः पौत्रादिदर्शनं व्रणशरीरः शुभयुते रोगाभावः पापयुते पापक्षेत्रे वातशैत्यादिरोगः। मन्दक्षेत्रे राहुयुते महारोगः॥

सप्तमे गुरुफलम्---विद्याधनेशः बहुलाभप्रदः चिन्ताधिकः विद्यावान् पातिव्रत्यभक्तियुतकलत्रः भावाधिपे बलहीने राहुकेतुशनि कुजयुते पापवीक्षणाद्वा कलत्रांतरम्। शुभयुते उच्चस्वक्षेत्रे एकदारवान् कलत्रद्वारा बहुवित्तवान्। सुखी चतुस्त्रिंशत्वर्षे प्रतिष्ठासिद्धिः॥

अष्टमे गुरुफलम्---अल्पायुः नीचकृत्यकारी। पापयुते पतितः। भावाधिपे शुभयुते रन्ध्रे दीर्घायुः। बलहीने अल्पायुः। पापयुते सप्तदशवर्षादुपरि विधवासङ्गमो भवति। उच्चस्वक्षेत्रे दीर्घायुःबलहीनःअरोगी पुण्यकर्ता पौरुषः विद्वान् वेदशास्त्रविचक्षणः॥

नवमे गुरुफलम्---धार्मिकः। तपस्वी साधुसमागमःधनिकःपञ्चत्रिंशवर्षेयज्ञकर्ता पितृदीर्घायुः सत्कर्मसिद्धिः अनेक प्रतिष्ठावान् बहुजनपालकः॥

दशमे गुरुफलम्---धार्मिकः शुभकर्मकारी गीतापाठकःयोग्यतावान् प्रौढकीर्तिः बहुजनपूज्यः भावाधिपे बलयुते विशेषक्रतुसिद्धिः। पापयुते पापक्षेत्रे कर्मविघ्नः। दुष्कृतिः यात्रायां लाभहीनः॥

एकादशे गुरुफलम्---विद्वान् धनवान् बहुलाभवान् द्वात्रिंशद्वर्षे अश्वारूढः अनेक प्रतिष्ठासिद्धिः। शुभपापयुते गजलाभः भाग्यवृद्धिः चन्द्रयुते निक्षेपलाभः॥

द्वादशे गुरुफलम्---निर्धनः पठितः अल्पपुत्रः गणितशास्त्रज्ञः सम्भोगी। ग्रन्थिव्रणी अयोग्यः शुभयुते उच्चस्वक्षेत्रे स्वर्गलोकप्राप्तिः पापयुते पापलोकः। धर्ममूलेन धनव्ययः ब्राह्मण स्त्रीसम्भोगी गर्भिणीसङ्गमी॥ उच्चे स्वक्षेत्रे जनहितकारी, राष्ट्रसेवकः॥

शुक्रभावफलम्।

लग्ने भार्गवे फलम्---॥गणितशास्त्रज्ञः। दीर्घायुः दारप्रियः वस्त्रालङ्कारप्रियः रूपलावण्यप्रियः गुणवान् स्त्रीप्रियः धनी विद्वान्। शुभयुते अनेभूषणवान्। स्वर्णकान्तिदेहः। पापवीक्षितयुते नीचास्तगते चोरवञ्चनवान् वातश्लेष्मादिरोगवान् भावाधिपे राहुयुते वृद्धबीजो भवति। वाहने शुभयुते गजाश्वैश्वर्यवान् एवं सौख्ययुतेः स्वक्षेत्रे महाराजयोगः। रन्ध्रे अष्टव्ययाधिपे शुक्रे दुर्बले स्त्रीद्वयम्। चञ्चलभाग्यः क्रूरबुद्धिः॥

द्वितीये शुक्रफलम्---धनवान् कुटुम्बी सुभोजनः विनयवान्। नेत्रे विलासधनवान् सुमुखः दयावान् परोपकारी। द्वात्रिंशद्वर्षे उत्तमस्त्रीलाभः। भावाधिपे दुर्बले दुःस्थाने नेत्रवैपरीत्यं भवति। शशियुते निशान्धः कुटुम्बहीनो नेत्ररोगी धननाशकरः॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

तृतीये शुक्रफलम्---अतिलुब्धः दाक्षिण्यवान् भ्रातृवृद्धिः सङ्कल्पसिद्धिः पश्चात्सहोदराभावः। क्रमेण भ्रातृतत्परः वित्तभोगपरः भावाधिपे बलयुते उच्च स्वक्षेत्रे भ्रातृवृद्धिः दुःस्थाने पापयुते भ्रातृनाशः॥

चतुर्थे शुक्रफलम्---शोभनवान् बुद्धिवान् भ्रातृसौख्यं सुखी क्षमावान्। त्रिंशद्वर्षे अश्ववाहनप्राप्तिः। क्षीरसमृद्धिः। भावाधिपे बलयुते अश्वान्दोलिकाकनकचतुरङ्गादिवृद्धिः। तत्र पापयुते पापक्षेत्रे अरिनीचगे बलहीने क्षेत्रवाहनहीनः। मातृक्लेशवान्। कलत्रान्तरभोगी॥

पञ्चमे शुक्रफलम्---बुद्धिमान् मन्त्री सेनापतिः। मातृसेवकः यौवनदारपुत्रवान्। राजसन्मानी मन्त्री सूज्ञः स्त्रीप्रसन्नता वृद्धिः। तत्र पापयुते पापक्षेत्रे अरिनीचगे बुद्धिजाड्ययुतः पुत्रनाशः। तत्र शुभयुते बुद्धिमान् नीतिवान्पुत्रप्राप्तिः। वाहनयोगः॥

षष्ठे शुक्रफलम्---ज्ञातिप्रजासिद्धिःशत्रुक्षयः पुत्रपौत्रवान् अपात्र व्ययकारी मायावादी रोगवान्। भावाधिपे बलयुते शत्रुज्ञातिवृद्धिः शत्रुपापयुते नीचस्थे शत्रुज्ञातिनाशः॥

सप्तमे शुक्रफलम्---अतिकामुकः मुखचुम्बकः अर्थवान् परदाररतः वाहनवान् सकलकार्यनिपुणः स्त्रीद्वेषी सत्प्रधानजनबन्धुकलत्रः। पापयुते शत्रुक्षेत्रे अरिनीचगे कलत्रनाशः। विवाहद्वयम्। बहुपापयुते। अनेककलत्रान्तरप्राप्तिः। पुत्रहीनः। शुभयुते उच्चे स्वक्षेत्रे तूले कलत्रदेशे बहुवित्तवान्। कलत्रमूलेन बहुप्राबल्ययोगः स्त्रीचिंतकः॥

अष्टमे शुक्रफलम्---सुखी चतुर्थे वर्षे मातृगण्डः। मध्यायुः रोगी हितदारवान् असन्तुष्टः। शुभयुते शुभक्षेत्रे पूर्णायुः तत्र पापयुते अल्पायुः॥

नवमे शुक्रफलम्---धार्मिकः तपस्वी अनुष्ठानपरः। पादे बहूत्तमलक्षणः धर्मो भोगवृद्धिः सुतदारवान्। पितृदीर्घायुः तत्र पापयुते पित्ररिष्टवान्। पापयुते पापक्षेत्रे अरिनीचगे धनहानिः। गुरुदारगः। शुभयुते भाग्यवृद्धिः। महाराजयोगः। वाहनकामेशयुते महाभाग्यवान् अश्वान्दोल्यादि वाहनवान्। वस्त्रालङ्कारप्रियः॥

दशमे शुक्रफलम्---बहुप्रतापधान् सङ्कल्पसिद्धिशुभकर्मकारी। अनेकवाहनवान् पापयुते कर्मविघ्नकरः गुरुबुधचन्द्रयुते अनेक वाहनारोहणवान्। अनेकक्रतुसिद्धिः। दिगन्तविश्रुतकीर्तिः अनेकराजयोगः बहुभाग्यवान् वाचालः सधनसुशीलदारवान्॥

एकादशे शुक्रफलम्---विद्वान् बहुधनवान् भूमिलाभवान् दयावान् शुभयुते अनेकवाहनयोगः। पापयुते पापमूलात् धनलाभः। शुभयुते॥ शुभमूलात्। नीचक्षेत्रे पापरन्ध्रेशादियोगे लाभहीनः॥

द्वादशे शुक्रफलम्---बहुतदारिद्र्यवान्। पापयुते विषयलुब्धपरः। शुभयुक्श्चेत् बहुधनवान्। शय्यामञ्चकादिसौख्यवान् शुभलोकप्राप्तिः पापयुते नरकप्राप्तिः।

शनिफलम्।

लग्ने मन्दफलम्---वातपित्तदेहः। उच्चे पुरग्रामाधिपः धनधान्यसमृद्धिः॥ स्वक्षेत्रे पितृधनवान्। वाहनेशकर्मेशभाग्येशक्षेत्रे बहुभाग्यम्। महाराजयोगः। चन्द्रमसाहष्टे पराम्नभुक्। शुभदृष्टे निवृत्तिः॥

द्वितीये शनिफलम्---द्रव्याभावः दारद्वयम्। पापयुते दारवञ्चना मठाधिपः अल्पक्षेत्रवान् नेत्ररोगी॥

तृतीये शनिफलम्---भ्रातृहानिकारकः। दुर्वृत्तः। उच्चे स्वक्षेत्रे भ्रातृवृद्धिः। तत्र पापयुते भ्रातृद्वेषी॥ प्रतापवान्॥

चतुर्थे शनिफलम्---मातृहानीः द्विमातृवान् सौख्यहीनः निर्धनः। उच्चस्वक्षेत्रे न दोषः। अश्वान्दोलनाश्वरोही। लग्नेशे मन्दे मातृदीर्घायुः। सौख्यवान्। रंध्रेशयुक्ते मात्ररिष्टम्। सुखहानिः॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

पंचमे शनिफलम्-पुत्रहीनः अतिदरिद्री दुर्वृत्तः दत्तपुत्री । स्वक्षेत्रे स्त्रीप्रजासिद्धिः। गुरुदृष्टे स्त्रीद्वयम् तत्र प्रथमा ऽ पुत्रा द्वितीया पुत्रवती। बलयुते मन्दे स्त्रीभिर्युक्तः।।

षष्ठे शनिफलम्—अल्पज्ञातिः शत्रुक्षयः धनधान्यसमृद्धः। कुजयुते देशान्तरसञ्चारी। अल्पराजयोगः भंगयोगात्कचित्सौख्यं क्वचियोगभङ्गः रंध्रेशे मंदे अरिष्टं वातरोगी शूलव्रणदेही ॥

सप्तमे शनिफलम्—शरीरदोषकरः कृशकलत्रः वेश्यासंभोगवान् अतिदुःखी उच्चस्वक्षेत्रगते अनेक स्त्रीसम्भोगी। केतुयुते स्त्रीसम्भोगी। कुजयुते शिश्नचुम्बनपरः शुक्रयुते भगचुम्बनपरः परस्त्रीसम्भोगी ॥

अष्टमे शनिफलम्—त्रिपादायुः दरिद्री शूद्रस्त्रीरतः सेवकः उच्चस्वक्षेत्रे दीर्घायुः। अरिनीचगे भावाधिपे अल्पायुःकष्टान्नभोगी

नवमे शनिफलम्—अधिपतिः जीर्णोद्धारकर एकोनचत्वारिंशद्वर्षे तटाकगोपुरनिर्माणकर्ता उच्चस्वक्षेत्रे पितृदीर्घायुः पापयुते दुर्बले पित्र्यरिष्टवान् ॥

दशमे शनिफलम्—पञ्चविंशतिवर्षे गङ्गास्नायी अतिलुब्धः पित्तशरीरी। पाप युते कर्मविघ्नकरः॥ शुभयुते कर्मसिद्धिः ॥

एकादशे शनिफलम्—बहुधनी विघ्नकरः भूमिलाभः राजपूजकः। उच्चस्वक्षेत्रे विद्वान्। महाभाग्ययोगः बहुधनी वाहनयोगः ॥

द्वादशे शनिफलम्—पतितः विकलाङ्गः। पापयुते नेत्रच्छेदः। शुभयुते सुखी सुनेत्रः पुण्यश्लोकप्राप्तिः पापयुते नरकप्राप्तिः। अपात्रव्ययकारी निर्धनः शुभयुते राजयोगकरः ॥

केंद्रे मंदे षट्त्रिंशत्वर्षादुपरि भाग्यवृद्धिः। जनसेवकः मित्रवृद्धिः। समाजकार्ये राजकार्येच कुशलः सन्मानलाभश्च॥

राहुकेतुफलम् ।

लग्ने राहुकेतुफलम्— ॥ मृतप्रसूतिः। मेषवृषभकर्कराशिस्थे दयावान् ॥ बहुभोगी। अशुभे शुभदृष्टे मुखलाञ्छनी ॥

द्वितीये राहुकेतुफलम्—निर्धनः देहव्याधिः पुत्रशोकः श्यामवर्णः पापयुते कलत्रद्वयम्। शुभयुते चुबुके लाञ्छनम्। पूर्ववत् ॥

तृतीये राहुकेतुफलम्—पराक्रमीः साहसोद्यमी. भाग्यैश्वर्यसंपन्नः परदेशयुतः

चतुर्थे राहुकेतुफलम्—बहुभूषणसमृद्धः जाया द्वयं, सेवकः मातृक्लेशः पापयुते निश्चयेन। शुभयुतेदृष्टे वा न दोषः ॥

पञ्चमे राहुकेतुफलम्—पुत्राभावः सर्पशापात् सुतक्षयः। नागप्रतिष्ठया पुत्रप्राप्तिः। पवनव्याधिः। दुर्मार्गी राजकोपः दुष्टग्रामवासी ॥

षष्ठे राहुकेतुफलम्—धारिष्ठवान् अतिसुखी। इन्दुयुते राजस्त्रीभोगी। निर्धनः चोरः शुभयुते धनसौख्यः ॥

सप्तमे राहुकेतुफलम्—दारद्वयंतन्मध्ये प्रथमस्त्रीनाशः।द्वितीये कलत्रे गुल्मव्याधिः। पापयुते गंडोत्पत्ति शुभयुते गण्डनिवृत्तिः। नियमेन दारद्वायम् शुभयुते एकमेव ॥

अष्टमे राहुकेतुफलम्—अतिरोगी द्वात्रिंशद्वर्षायुष्मान्। शुभयुते पञ्चचत्वारिंशद्वर्षे भावाधिपे बलयुते स्वोच्चेषष्टिवर्षाणि वा जीवितम् ॥

नवमे राहुकेतु फलम्—पुत्रहीनः शूद्रस्त्रीसम्भोगी सेवकः धर्महीनः ॥

दशमे राहुकेतुफलम्—वितंतुसङ्गमः दुर्ग्रामवासः। शुभयुते न दोषः। काव्यव्यसनः। दासीसंप्रदायी ॥

एकादशे राहुकेतुफलम्—पुत्रैः समृद्धः धनधान्यसमृद्धः॥

द्वादशे राहुकेतु फलम्—अल्पपुत्रः। नेत्ररोगी।पापगतिः ॥

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri

नं. १

नं. २



दोन्ही कुंडल्यांच्या स्त्रियांस अद्याप संतती झालेली नाहीं. पण नं. २
ल्लीस ज्या वेळीं मकरेचा शनि येईल त्या वेळीं संततीचा योग निश्चितपण

तेजीमंदी निर्णय.

—श्रावण महिन्यांत दुसरा व चवथा आठवडा, भाद्रपदांत तिसरा आठवडा आणि आश्विनांत
... आठवडा याप्रमाणें तेजीचे योग आहेत. बाकीचा काल स्थिर अगर मंदी.

...सार माल व धान्यें—या वस्तूंना श्रावणापासून तेजीचेच योग आहेत. भाद्रपद व आश्विन यांत ...डी तरी तेजी वाढणारच.

शेअर—श्रावण महिन्याचा उत्तरार्ध, भाद्रपद दुसरा व चवथा आठवडा, आश्विन तिसरा व चवथ्या ...ाठवड्याचे शेवटीं ४ दिवस याप्रमाणें तेजीचा काल आहे.

सोनें, चांदी—श्रावण उत्तरार्धांत अल्पतेजी, भाद्रपदांत स्थिरता आणि आश्विन दुसरा व चवथा ...ाठवडा तेजीचा जाईल.

सूचना:—कॉटन, शेअर, सोनें, चांदी, वगैरे बाजारांत क्षणोक्षणीं भाव बदलत असतात; म्हणून ...यांना हा व्यवहार करणें असेल त्यांनीं दररोजची सूक्ष्म तेजीमंदी पाहून व व्यापारी धोरण लक्षांत घेऊन ...तर व्यवहार करावा. सूक्ष्म तेजीमंदीची एका वस्तूची एक महिन्याची फी ५० रु. आहे.

प्रकाशक:—रघुनाथ मोरेश्वर पटवर्धन. २४६, बुधवार पेठ, पुणें नं. २
मुद्रक:—अच्युत चिंतामण भट, यशवंत प्रेस, शनवार पेठ, पुणें नं. २

CC-0. Swami Atmanand Giri (Prabhuji) . Veda Nidhi Varanasi. Digitized by eGangotri